केरलपाठावलिः

# संस्कृतम्

## नवमी कक्ष्या

अक्कादमिक-संस्कृतविद्यालयानां कृते।

KERALA READER

# SANSKRIT

## STANDARD- IX

FOR ACADEMIC AND SANSKRIT SCHOOLS

Government of Kerala
Department of General Education

State Council of Educational Research and Training (SCERT), Kerala

2024

ST-263-1-SANSKRIT-(A/S)-9

## राष्ट्रगीतम्

जनगण मन अधिनायक जय हे,
भारतभाग्यविधाता।
पंजाब सिंध गुजरात मराठा,
द्राविड़ उत्कल बंगा।
विंध्य हिमाचल यमुना गंगा,
उच्छलजलधितरंगा।
तव शुभ नामे जागे,
तव शुभ आशिष माँगे,
गाहे तव जय-गाथा।
जनगणमंगलदायक जय हे,
भारतभाग्यविधाता।
जय हे जय हे जय हे
जय जय जय जय हे।

## प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च।

अहं पितरौ गुरूंश्चादरिष्ये बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च।

मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

**Prepared by**
State Council of Educational Research and Training (SCERT)
Poojappura, Thiruvananthapuram 695012, Kerala
Website: www.scertkerala.gov.in
email: scertkerala@gmail.com
Phone:0471-2341883, fax;0471-231869
Typesetting and Layout: SCERT
First Edition: 2024
Printed at : KBPS, Kakkanad, Kochi-30
Department of General Education, Government of Kerala

प्रियच्छात्राः

नवमकक्ष्यायाः संस्कृतपाठ्यपुस्तकं भवतां पुरतः प्रस्तूयते। कथा, कविता, उपन्यासः, सम्भाषणं, यात्राविवरणं, सुभाषितं, चम्पू, काव्यम् इत्यादिभिः व्यवहाररूपैः सम्पुष्टं भवतीदं पाठ्यपुस्तकम्।

राष्ट्रीय-कौशल-योग्यता-प्रारूपम् (NSQF), सूचन-प्रौद्योगिक(ICT) उपाधयश्च पाठ्यपुस्तकेऽस्मिन् परिगणिताः सन्ति।

स्वतन्त्रवाचनाय, स्वतन्त्रचिन्तायै सर्गवैभवाय च पुस्तकेऽस्मिन् अवसराः समाकलिताः। भाषायाः प्रयोगोपाधिमवगन्तुं तद्वारा रचनाप्रवर्तनेषु भागं ग्रहीतुं च पठनानुभवाः कक्ष्याप्रकोष्ठात् अवाप्तव्याः।

पुस्तकस्यास्य अध्ययनेन संस्कृतस्य विशालं लोकं प्रवेष्टुं प्रेरणा नूनं भविष्यतीति आशासे।

भवदीयः

डाः जयप्रकाश् आर्. के

निदेशकः

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम्

## TEXTBOOK DEVELOPMENT COMMITTEE
## SANSKRIT IX- ACADEMIC

### Advisor

**V. Madhavan Pillai** , Associate Professor in Sanskrit ( Rtd).

### Chairperson

**Ramachandran. N K**, DEO( Rtd), Wayanad.

### Experts

**Dr. Renil Dev M R,** Assistant Professor in Sanskrit,Department of Vyakarana, Govt. Sanskrit Collage, Trivandrum,

**Dr. Shihab N A**, Assistant Professor in Sanskrit,Department of Sanskrit, University of Calicut.

### Participants

Dr.Hariprasad. V. T, HST (Skt), GHSS Thiruvangad,Thalassery, Kannur.

Jees Verghese P D, HST (Skt), St.Joseph's HSS Velupadom,Thrissur.

Jose.C.V, HST (Skt), Holy Cross HSS Mapranam, Irinjalakuda,Thrissur.

Dr.Nidheesh. M. G, HST (Skt), GHSS Chempuchira. Thrissur.

Parameswaran .H, HST (Skt), GVHSS Kanhangad, Kasargod.

Premanandan.K.M, HST (Skt), GVHSS Karakurussi, Palakkad.

Rajeevan.M, HST (Skt), A V S G H S S Karivallur, Kannur.

**Dr. Sabarees.M,** HST (Skt), H S S Mundur, Palakkad.

Sreekumar. C.R, HST (Skt), Ramavilasam HSS, Chokli, Thalassery, Kannur.

**Abhijith Krishna R S** , Diamond Jubilee Fellowship artist (Sculpture) Directorate of Culture, Trivandrum.

**Vishnulal P A**,Drawing Teacher, Govt. H S Poyappally, Kollam.

### ACADEMIC CO-ORDINATOR

**Deepa N Kumar**

Research Officer(I/C Sanskrit) SCERT, Kerala.

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम्।
STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING , KERALA

# विषयानुक्रमणिका


| एककम् | | पाठस्य नाम | व्यवहाररूपम् | पुटसंख्या |
|---|---|---|---|---|
| १ पल्लवम् | १ | विश्वसौन्दर्यम् | कविता | ८ |
| | २ | जीवातुरेव द्रुमः | कथा | १४ |
| २ पलाशम् | ३ | सुखजीवनम् | सुभाषितम् | २५ |
| | ४ | क्षुधा ज्ञानप्रदायिनी | चम्पूः | ३२ |
| | ५ | हितमेवाऽनुयात् सदा | सम्भाषणम् | ३९ |
| ३ कुड्मलम् | ६ | मयूरशिखा | उपन्यासः | ५५ |
| | ७ | नियम्यतां स्वयम् | काव्यम् | ६३ |
| | ८ | गच्छामो वयम् | यात्राविवरणम् | ७४ |
| ४ प्रसूनम् | ९ | कारुण्यम् | पटकथा | ८७ |
| | १० | मुक्तकसौभगम् | काव्यम् | ९५ |


## पठनप्रवर्तनानां सूचकानि।



# ഭാരതത്തിന്റെ ഭരണഘടന

## ആമുഖം

**ഭാരതത്തിലെ ജനങ്ങളായ നാം** ഭാരതത്തെ ഒരു [1]**[പരമാധികാര സ്ഥിതിസമത്വ മതേതര ജനാധിപത്യ റിപ്പബ്ലിക്കായി]** സംവിധാനം ചെയ്യുവാനും അതിലെ പൗരന്മാർക്കെല്ലാം:

സാമൂഹ്യവും സാമ്പത്തികവും രാഷ്ട്രീയവും ആയ **നീതിയും;**

ചിന്തയ്ക്കും ആശയപ്രകടനത്തിനും വിശ്വാസത്തിനും മതനിഷ്ഠയ്ക്കും ആരാധനയ്ക്കും ഉള്ള **സ്വാതന്ത്ര്യവും;**

പദവിയിലും അവസരത്തിലും **സമത്വവും;** സംപ്രാപ്തമാക്കുവാനും;

അവർക്കെല്ലാമിടയിൽ

വ്യക്തിയുടെ അന്തസ്സും [2][രാഷ്ട്രത്തിന്റെ ഐക്യവും അഖണ്ഡതയും] ഉറപ്പുവരുത്തിക്കൊണ്ട് **സാഹോദര്യം** പുലർത്തുവാനും;

സഗൗരവം തീരുമാനിച്ചിരിക്കയാൽ;

**നമ്മുടെ ഭരണഘടനാനിർമ്മാണസഭയിൽ** ഈ 1949 നവംബർ ഇരുപത്താറാം ദിവസം **ഇതിനാൽ ഈ ഭരണഘടനയെ സ്വീകരിക്കുകയും നിയമമാക്കുകയും നമുക്കു തന്നെ പ്രദാനം ചെയ്യുകയും ചെയ്യുന്നു.**

---

1. 1976 - ലെ ഭരണഘടന (നാല്പത്തിരണ്ടാം ഭേദഗതി) ആക്റ്റ് 2-ാം വകുപ്പു പ്രകാരം "പരമാധികാര ജനാധിപത്യ റിപ്പബ്ലിക് "എന്നതിന് പകരം ചേർത്തത് (3.1.1977 മുതൽ പ്രാബല്യം).
2. മേല്പറഞ്ഞ ആക്റ്റ് 2-ാം വകുപ്പു പ്രകാരം "രാഷ്ട്രത്തിന്റെ ഐക്യം" എന്നതിനു പകരം ചേർത്തത് (3.1.1977 മുതൽ പ്രാബല്യം).

# एककम् १

# पल्लवम्



## आमुखम्

नवमकक्ष्यापाठपुस्तकस्य प्रथममेककं भवतीदम्। पूर्वस्मिन् वर्गे अङ्कुरितस्य संस्कृतपादपस्य नवपल्लवः अस्मिन्नेकके विराजते। प्रकृतिविषयकौ द्वौ पाठभागौ अत्र समाकलितौ। प्रथमं प्रकृतिचारुतावर्णनापरं **विश्वसौन्दर्यं** नामकं गीतकं, सस्यान्यपि सुखदुःखान्यनुभवन्ति इति प्रतिपाद्यमाना **जीवातुरेव द्रुमः** नामिका कथा च भवतः। एतयोः पाठयोः अध्ययनेन वयमपि प्रकृत्युपासकाः स्याम।

# पाठः १

# विश्वसौन्दर्यम्।



**पाठप्रवेशः**

प्रकृतेः सौन्दर्यम् अन्यादृशम् अतुलम् अनुभववेद्यं च भवति। प्रातःकालस्य मनोहारिताम् अनुभूय पक्षिणः, तथा रात्रेः निश्शब्दतायाः सुखानुभवेन निशागीतकाः च यावच्छक्यं गायन्ति। प्रकृतेः सौन्दर्येण आकृष्टाः वयमपि बहुना प्रकारेण गायामः। तादृशमेकं गीतमत्र पठामः।

## आमुखम्

अध्ययनवर्षारम्भे प्रथममेवागच्छति विश्वपर्यावरणदिनम्। सन्दर्भेऽस्मिन् प्रतिवर्षं नूतनानाशयान् स्वीकृत्यैव दिनाचरणं प्रचलति। अस्य दिनाचरणस्य उद्देश्यं किम्? दिनमिदम् अस्मान् किम् उद्बोधयति? अस्मान् परितः के के प्रकृतिविभवाः सन्ति? तेषाम् उपभोक्तारः के? तेषां संरक्षणं किमर्थं करणीयम्? पश्यन्तु।

विशालसुन्दरविश्वं पश्यतु
नयनानन्दकरम्।
सर्वचराचरनिवासमतुलं
मदीयनाकमिमम्।।

वहन्ति नद्यस्तिष्ठन्त्यस्मिन्
महाचला बहवः।
अरण्यकेदारोपवनानि
सुखप्रदानि तथा।।

कूपतटाकलतातरुवृन्दा-
न्यत्र विराजन्ते।
प्रवाति पवनः सुमगन्धवहो
विभाति खद्योतः।।

वर्षन्त्यस्मिन् काले काले
नवाम्बुभिर्मेघाः।
पुष्पफलाढ्या ऋतवः काले
प्रत्यायान्ति मुदा।।

अस्मान् परितः प्रवर्धमाना
सुस्थितिरेवं स्यात्।
वयन्तु तेषां पालनविषये
सन्नद्धाः स्याम।।



## पदच्छेदः

| | | |
|---|---|---|
| महाचला बहवः | - | महाचलाः + बहवः। |
| नद्यस्तिष्ठन्त्यस्मिन् | - | नद्यः + तिष्ठन्ति + अस्मिन्। |
| वर्षन्त्यस्मिन् | - | वर्षन्ति + अस्मिन्। |
| नवाम्बुभिर्मेघाः | - | नवाम्बुभिः+ मेघाः। |
| कूपतटाकलतातरुवृन्दान्यत्र | - | कूपतटाकलतातरुवृन्दानि + अत्र। |
| सुमगन्धवहो विभाति | - | सुमगन्धवहः + विभाति। |
| सुस्थितिरेवं | - | सुस्थितिः+ एवम्। |

## विग्रहः

| | | |
|---|---|---|
| विशालसुन्दरविश्वम् | - | विशालं च तत् सुन्दरं च विशालसुन्दरं तादृशं विश्वम्। |
| सर्वचराचरनिवासम् | - | चराणाम् अचराणां च तेषां समाहारः चराचरं, सर्वं च तत् चराचरं च सर्वचराचरम्। तेषां निवासम्। |
| अतुलम् | - | नास्ति तुला यस्य, तम्। |
| नयनानन्दकरम् | - | नयनयोः आनन्दः नयनानन्दः, करोति इति करः, नयनानन्दस्य करः, तम् । |
| महाचलाः | - | महान्तः च अमी अचलाःच। |
| अरण्यकेदारोपवनानि | - | अरण्यं च केदारः च उपवनं च अरण्यकेदारोपवनानि। |
| सुखप्रदानि | - | सुखं प्रददाति, तानि। |
| खद्योतः | - | खं द्योतयति इति। |
| सुमगन्धवहः | - | सुमानां गन्धः सुमगन्धः , तस्य वहः। |

नवाम्बुभिः - नवं च तत् अम्बु च नवाम्बु, तैः ।

पुष्पफलाढ्याः - पुष्पाणि च फलानि च पुष्पफलानि, तैः आढ्याः।

## पठनप्रवर्तनानि

**बालकवितां ताललयानुसारम् आलपतु।**

**श्रद्धेयाः अंशाः**

आशयज्ञानम् ।

उच्चारणस्फुटता।

तालबोधः।

**नूतनपदानि चित्वा अर्थं लिखतु।**

**श्रद्धेयाः अंशाः**

उचितपदलेखनम्।

आशयावबोधः।

प्रादेशिकभाषायाम् अर्थलेखनम्।

**उपसर्गयुक्तपदानि चित्वा लिखतु।**

**श्रद्धेयौ अंशौ**

उचितपदचयनम्।

उपसर्गानाम् अवबोधः।

**प्रयोगविशेषं ज्ञात्वा उदाहरणानुसारं वाक्यानि लिखतु।**

**उदा - विद्यालयस्य** परितः वृक्षाः सन्ति।

**विद्यालयं** परितः वृक्षाः सन्ति।

**क) पुष्पस्य** परितः भ्रमराः सन्ति।

ख) गृहस्य परितः प्राकाराः सन्ति।

ग) आराधनालयस्य परितः भक्ताः सन्ति।

**श्रद्धेयौ अंशौ**

आशयावबोधः।

उचितविभक्तिप्रयोगः।



**कवितायाः आशयं सूचनानुसारं लघूपन्यासरूपेण परिवर्त्य लिखतु।**

**सूचनाः** - प्रपञ्चम् ...... पञ्चभूतानि ........ परितः स्थितेः संरक्षणम्
- अन्तरिक्षमलिनीकरणम्-- पर्वतखननम् ....।

**श्रद्धेयाः अंशाः**

आशयावबोधः।

वाक्यघटना।

लेखनसामर्थ्यम्।



**समानाशययुक्तानां बालकवितानां सम्पुटं रचयतु।**

**श्रद्धेयाः अंशाः**

औचित्यम्।

आशयावबोधः।

घटना।



**प्रकृतिदृश्यं विलिख्य वर्णलेपनं करोतु।**

**श्रद्धेयाः अंशाः**

उचितवर्णप्रयोगः।

आशयावबोधः।

औचित्यम्।

# अधिकवाचनांशः

**उपसर्गः ।**

**द्वाविंशतिसंख्यकाः अद्रव्यवाचिनः प्रादयः क्रियायोगे उपसर्गाः इति व्यवह्रियन्ते। ते-**

प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्,वि, आङ्, नि, अधि, अपि, अति, सु, उद्, अभि, प्रति, परि,उप।

प्रविपरापसमन्ववनिर्निसो
दुरति दुष्प्रति सूद्धि पर्यभि।
तदनु चाङभिनी उपविंशति
द्विसहितेत्युपसर्गसमाह्वयाः।।

***उदा-*** **प्र** + हरति - प्रहरति, **आ** + हरति - आहरति,
**वि** + हरति - विहरति, **परि** + हरति - परिहरति,
**सम्** + हरति - संहरति, **उप** + हरति - उपहरति।

**प्रयोगविशेषः।**

**उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।**
**प्रहाराहारनीहारविहारपरिहारवत्।।**

**परितः इति पदस्य योगे द्वितीयाविभक्तिः प्रयुज्यते।**

***उदा-*** **ग्रामं** परितः नदी प्रवहति।
**चन्द्रं** परितः मेघाः गच्छन्ति।
**अध्यापकं** परितः छात्राः तिष्ठन्ति।

पाठः २

# जीवातुरेव द्रुमः

पाठप्रवेशः

पूर्वस्मिन् पाठभागे प्रकृतेः मनोहारिताम् अधिकृत्य किञ्चित् जानीमो वयम्। तस्य संरक्षणाय सस्यानां संरक्षणमेव प्रथमं करणीयम्। यत्र यत्र सस्यानां नाशनं दृश्यते तत्र तत्र अस्माभिः तन्निवारणीयम्। सस्यानि अस्माकं प्राणान् परिपालयन्ति । अतः तेषां सस्यानां जीवनसंरक्षणम् अस्माकमपि कर्तव्यमेव।

## आमुखम्

प्रकृतेः अभिन्नाः भागाः सन्ति वनस्पतयः। वनस्पतीनां सर्वे भागाः सर्वेषां प्राणिनां कृते सर्वथा उपयोगप्रदाः भवन्ति। तथापि अन्यपशव इव ते न चलन्ति, कोलाहलं च न कुर्वन्ति। अतः सस्यानां प्राणाः तथा तेषां संवेदनक्षमता च न सन्ति इति भ्रान्त्या मन्यामहे वयम्। तस्मिन् विषये एकां लघुकथाम् अत्र ज्ञास्यामः।



उपरिवनाख्ये ग्रामे केचन बालकाः खेलन्ति स्म। तेष्वेको बालकः समीपस्थितस्य कस्यचन वृक्षकस्य शाखां छित्वा यष्टिमकरोत्। तद् दृष्ट्वा इतरे बालकाः अपि तस्य बालवृक्षस्य शाखापत्राणि भञ्जयितुम् आरभन्त। बालकानां क्रीडामिमां समीक्ष्य निकटस्थाद् भवनादागत्य काचिन्महिला एवमवदत्।

'भो बालकाः एवं मा कुर्वन्तु। बालवृक्षस्य शाखां न भञ्जयन्तु।'

तस्याः वचनं श्रुत्वा तेषु अन्यतमः अपृच्छत्।

'वृक्षस्य शाखाभङ्गेन तस्य वेदना भवति वा ? दुःखान्यनुभोक्तुं वृक्षस्य प्राणाः सन्ति वा ?'

बालकस्य नीरसोपेतमपि साकांक्षं वाक्यमिदं निशम्य सा नारी पुनरप्यभाषत।

'आम् बालकाः । वृक्षाणामपि जीवनमस्ति। वयमिव तेऽपि श्वसन्ति पिबन्ति च। यदि भवतां संशयश्चेत् अध्यापकं पृच्छन्तु' इति।

परेद्युः तेष्वेकः

अध्यापकमुपगम्य सस्यानि प्राणान् धरन्ति वा इति शङ्कां प्राकटयत्। तस्य जिज्ञासां विज्ञाय किञ्चिद्विहस्य अध्यापकोऽब्रवीत्।



भवता यत्पृष्टं तदधिकृत्य महाभारतस्य शान्तिपर्वणि कश्चित् प्रसङ्गोऽस्ति भृगु-भरद्वाजसंवादरूपेण। तत्र सस्यानि प्राणान् धरन्ति वा इति भरद्वाजोऽपि पृच्छति। वृक्षाः रोगपीडिताः भवन्ति। चिकित्सया तेषां रोगविमुक्तिरपि भवति। सूर्यातपेन ते सङ्कुचन्ति। वृष्ट्या पल्लविताः च भवन्ति। छिद्यते चेत् तस्मात् स्रवाः क्षरन्ति। लताः वृक्षान् उपगम्य तान् परिवेष्टन्ते। यत्र सूर्यांशवः तस्यां दिशि ते उन्मुखाः तिष्ठन्ति।

ते पादैः जलं पिबन्ति इत्यतः पादपाः इति कथ्यन्ते। इति विविधैः लौकिकदृष्टान्तैः भृगुः सस्यानि असुं दधते इति विशदीकरोति।

आधुनिकेऽपि काले जगदीश् चन्द्र बोस् इति प्रख्यातो भारतीयसस्यशास्त्रज्ञः सस्यानि प्राणान् धरन्ति इति बहुविधैः प्रमाणैः समर्थयति स्म। अतः वत्स! सर्वेषामपि जन्तूनां सस्यानां रक्षणं पोषणं च सर्वथा करणीयं भवति ।

अपूर्वेणानेन विज्ञानेन प्रहृष्टस्य बालकस्य वदनं सूर्यांशुस्पर्शनेन राजीवमिव क्षणेनैव प्रफुल्लमभवत्।

**पदच्छेदः**

| | | |
|---|---|---|
| क्रीडामिमाम् | - | क्रीडाम् + इमाम्। |
| भवनादागत्य | - | भवनात् + आगत्य। |
| काचिन्महिला | - | काचित् + महिला। |
| पुनरप्यभाषत | - | पुनः + अपि + अभाषत। |
| तेऽपि | - | ते + अपि। |
| संशयश्चेत् | - | संशयः + चेत्। |
| तेष्वेकः | - | तेषु + एकः। |
| किञ्चिद्विहस्य | - | किञ्चित् + विहस्य। |
| अध्यापकोऽब्रवीत् | - | अध्यापकः + अब्रवीत्। |
| तदधिकृत्य | - | तत् + अधिकृत्य। |
| प्रसङ्गोऽस्ति | - | प्रसङ्गः + अस्ति। |
| भरद्वाजोऽपि | - | भरद्वाजः + अपि। |

रोगविमुक्तिरपि - रोगविमुक्तिः + अपि।

आधुनिकेऽपि - आधुनिके + अपि।

अपूर्वेणानेन - अपूर्वेण + अनेन।

क्षणेनैव - क्षणेन + एव।

**विग्रहः**

शाखापत्राणि - शाखा च पत्रं च शाखापत्रम्, तानि।

बालवृक्षस्य - बालः च असौ वृक्षः बालवृक्षः, तस्य।

अन्यतमः - अनेकेषु एकः।

शाखाभङ्गेन - शाखायाः भङ्गः शाखाभङ्गः, तेन।

नीरसोपेतः - नीरसेन उपेतः।

## पठनप्रवर्तनानि



**कथां पठित्वा महिलायाः बालकानां च अथवा अध्यापकस्य बालकस्य च मिथः सम्भाषणं रचयतु।**

**श्रद्धेयाः अंशाः**

आशयज्ञानम् ।

प्रश्नवाचकशब्दानामुपयोगः।

उपचारशब्दानां प्रयोगः।



**पाठभागात् भूतकालक्रियापदानि चित्वा वाक्यानि रचयतु।**

**श्रद्धेयौ अंशौ**

अर्थावगमनम् ।

उचितरीत्या वाक्येषु प्रयोगः।

ST-263-2-SANSKRIT-(A/S)-9

## क्त्वान्त-ल्यबन्त-तुम्मुन्नन्तानि अन्यानि अव्ययानि च चित्वा पट्टिकां रचयतु।

| क्त्वान्तम् | ल्यबन्तम् | तुम्मुन्नन्तम् | अन्यत् |
| --- | --- | --- | --- |
| छित्वा | समीक्ष्य | भञ्जयितुम् | अपि |

**श्रद्धेयौ अंशौ**

विवेचनसामर्थ्यम् ।

उचितकोष्ठकेषु विन्यसनम्।

## अधोदत्तसूचनाः स्वीकृत्य जीवनचरितं लिखतु।

| | | |
| --- | --- | --- |
| नाम | - | जगदीश् चन्द्र बोस् (जे. सि. बोस्) |
| जन्म | - | १८५८ नवम्बर् ३० |
| पितरौ | - | भगवान् चन्द्रबोस् , प्रसन्नकुमारी देवी |
| कर्मक्षेत्रम् | - | सस्यशास्त्रज्ञः,जीवशास्त्रज्ञः |
| प्रसिद्धिः | - | रेडियोशास्त्रस्य पिता |
| मृत्युः | - | १९३७ नवम्बर् २३ |

**श्रद्धेयाः अंशाः**

सर्वासां सूचनानां स्वीकरणम् ।

वाक्यघटना।

जीवनचरितघटना।

## अधिकवाचनांशः

**कर्तव्यम् / करणीयम्**

कर्तुं योग्यम् अथवा कर्तुम् अर्हम् इत्याद्यर्थे तव्यत् अनीयर् इति कृत्यप्रत्ययौ प्रयुज्येते। उदा - स्मर्तुं योग्यं स्मर्तव्यम् /स्मरणीयम्। तथा -

लेखितव्यम्/लेखनीयम्। गन्तव्यम् /गमनीयम्। पूजितव्यम् / पूजनीयम्। भोक्तव्यम् / भोजनीयम्।

## शब्दकोशः।

| संस्कृतम् | संस्कृतम् | कैरली | कन्नडा | आङ्गलम् |
|---|---|---|---|---|
| अचलः | पर्वतः | പർവ്വതം | ಪರ್ವತ | Mountain |
| अतुलम् | सादृश्य-रहितम् | സമാനതകളില്ലാത്ത | ಹೋಲಿಸಲಾಗದ | Incomparable |
| अरण्यम् | वनम् | കാട് | ಅರಣ್ಯ | Forest |
| उपवनम् | आरामः | പൂന്തോട്ടം | ಹೂತೋಟ | Garden |
| केदारः | क्षेत्रम् | വയൽ | ಗದ್ದೆ | Field |
| खद्योतः | सूर्यः | സൂര്യൻ | ಸೂರ್ಯ | Sun |
| तरुः | द्रुमः | മരം | ಮರ | Tree |
| नाकः | स्वर्गः | സ്വർഗം | ಸ್ವರ್ಗ | Heaven |
| निवासः | गेहम् | വീട് | ಮನೆ | Home |
| पर्यावरणम् | वातावरणम् | പരിസ്ഥിതി | ಪರಿಸರ | Environment |

| | | | | |
|---|---|---|---|---|
| पल्लवम् | किसलयम् | തളിര് | ಚಿಗುರು | Tender leaf |
| पवनः | वायुः | കാറ്റ് | ಗಾಳಿ | Wind |
| प्रहृष्टः | सन्तुष्टः | സന്തുഷ്ടൻ | ಸಂತುಷ್ಟನಾದ | A happy man |
| यष्टिः | दण्डः | വടി | ಬೆತ್ತ | Stick |
| विश्वम् | जगत् | പ്രപഞ്ചം | ಜಗತ್ತು | Universe |

# किमधिगतम्

| पठनप्रवर्तनानि | स्वांशीकृतम् | भागिकतया स्वांशीकृतम् | प्रगतये प्रयत्नः विधेयः |
|---|---|---|---|
| कविताम् आलपति | | | |
| उपसर्गयुक्तपदानि चिनोति | | | |
| लघूपन्यासं लिखति | | | |
| सम्भाषणं रचयति | | | |
| भूतकालक्रियापदानि चिनोति | | | |
| अव्ययानि विविच्य लिखति | | | |
| जीवनचरितं रचयति | | | |

## क्रियापदपरिचयः

| | | | |
|---|---|---|---|
| विराजन्ते | - वि + राजृ दीप्तौ | आत्मनेपदी | लट् प्र.पु. ब.व। |
| | विराजते - विराजेते - विराजन्ते। | | |
| विभाति | - वि+भा दीप्तौ | परस्मैपदी | लट्. प्र.पु.ए.व। |
| | विभाति - विभातः- विभान्ति। | | |
| प्रत्यायान्ति | - प्रति+ आ+या प्रापणे | परस्मैपदी | लट् प्र.पु.ब.व। |
| | प्रत्यायाति - प्रत्यायातः- प्रत्यायान्ति। | | |
| स्याम | - अस् भुवि | परस्मैपदी | विधिलिङ् लट् उ.पु.ब.व। |
| | स्याम् - स्याव- स्याम। | | |
| परिपालयन्ति | - परि+ पाल रक्षणे | परस्मैपदी | लट् प्र.पु. ब.व। |
| | परिपालयति- परिपालयतः- परिपालयन्ति। | | |
| ज्ञास्यामः | - ज्ञा अवबोधने | परस्मैपदी | लृट् उ. पु. ब. व। |
| | ज्ञास्यामि- ज्ञास्यावः- ज्ञास्यामः। | | |
| भञ्जयन्तु | - भजि भासार्थे | परस्मैपदी | लोट् प्र. पु. ब. व। |
| | भञ्जयतु /भञ्जयतात्- भञ्जयताम्- भञ्जयन्तु। | | |
| अभाषत | - भाष् व्यक्तायां वाचि | आत्मनेपदी | लङ् प्र. पु. ए. व। |
| | अभाषत - अभाषेताम् - अभाषन्त। | | |
| अब्रवीत् | - ब्रूञ् व्यक्तायां वाचि | परस्मैपदी | लङ् प्र. पु. ए. व। |
| | अब्रवीत् - अब्रूताम् - अब्रुवन्। | | |
| सङ्कुचन्ति | - सम् + कुच् सङ्कोचने | परस्मैपदी | लट् प्र. पु. ब. व । |
| | सङ्कुचति - सङ्कुचतः - सङ्कुचन्ति। | | |
| परिवेष्टन्ते | - परि+वेष्ट् वेष्टने | आत्मनेपदी | लट् प्र. पु. ब. व। |
| | परिवेष्टते - परिवेष्टेते - परिवेष्टन्ते। | | |

## मातृका अभ्यासपत्रिका।

**अ) अधोदत्तवाक्याद् उपसर्गपदानि चित्वा लिखतु।**

**क)** गजाः जलं निपीय वनं प्रविशन्ति ।

**आ) उदाहरणानुसारं वाक्येषु परिवर्तयतु।**

**विद्यालस्य** परितः उद्यानम् अस्ति। - **विद्यालयं** परितः उद्यानम् अस्ति।

**क)** क्रीडकस्य परितः जनाः तिष्ठन्ति। .......................................।

**ख)** मोदकस्य परितःपिपीलिकाः सन्ति। .......................................।

**इ) खण्डिकां पठित्वा जीवनचरितरूपरेखां लिखतु।**

हरिप्पाट् महादेवमन्दिरस्य समीपस्थे चेम्प्रोल् मठे(भवने) १८८९ तमे वर्षे अम्बादेवित्तम्पुराट्टी जनिमलभत। अस्याः पिता कोट्टयं नाट्टकत्त् एलङ्ङल्लूर् कृष्णन् नम्पूतिरिः, माता कुञ्ञिक्कुट्टित्तम्पुराट्टी च आस्ताम्। चेप्पाट्ट् रामवार्यर्, कल्लम्पल्लि विष्णुनम्पूतिर्योः शिक्षणे सा काव्यनाटकालङ्कारादीनि अशिक्षत। बाल्ये कवितारचनापाटवं प्रकटितवती। सा कैरल्यां संस्कृते च कवितारचनासु समर्था आसीत्।भाषान्तरीकरणेऽपि अस्याः अत्यधिका अभिरुचिः आसीत्। तया मेल्पुत्तूर् नारायणभट्टतिरेः अष्टमीप्रबन्धः कैरल्या अनूदितः। एवं मानविक्रमएट्टन् तम्पुरान् महाभागेन कैरल्यां विरचितं दशकुमारचरितं तेनैव नाम्ना सा संस्कृते अनूदितवती। देवीस्तुतिः नाम स्तोत्रकाव्यमपि अनया विरचितं दृश्यते।

नाम - .......................................।

जन्म - .......................................।

पितरौ - .......................................।

कृतयः - .......................................।

मृतिः - .......................................।

**ई) उदाहरणानुसारं वाक्येषु परिवर्तयतु।**

**उदा - वरुणः द्विचक्रिकायां हिमालयं गच्छति।**

**वरुणः द्विचक्रिकायां हिमालयम् अगच्छत्।**

**क)** अयना संस्कृतोत्सवे गानम् आलपति। .........................................।

**ख)** आत्मिका परिस्थितिदिने बालवृक्षं रोपयति।.........................................।

**उ) प्रकृतिः सर्वेषाम् इत्यस्मिन् विषये सूचनानुसारं लघूपन्यासं लिखत।**

**सूचनाः** - पञ्चभूतात्मकं- अनेके जीवजालाः- परस्पराश्रयत्वं- चूषणं- सन्तुलितावस्था।

# एककम् २

# पलाशम्



## आमुखम्

पल्लवितोऽयं संस्कृतद्रुमः अत्र सम्पूर्णविकसितैः पलाशकैः विलसति। पलाशनामके अस्मिन्नेकके भोज्यमेव विषयः। अत्र त्रयः पाठाः समाकलिताः। हितमितभोज्यानां तथा व्यायामानां च प्राधान्यप्रतिपादकानि सुभाषितानि समाहृत्य **'सुखजीवनम्'** नामकः पाठः, बुभुक्षाविषयिका **'क्षुधा ज्ञानप्रदायिनी'** नामिका लघुचम्पूः, तथा भक्ष्यवैविध्यप्रतिपादकः **'हितमेवाश्नुयात् सदा'** इति सम्भाषणांशश्च। हितस्य मितस्य भोज्यस्य आदानप्रदानविषये सन्मार्गं प्रदर्शयति एककमिदम्।

पाठः ३

# सुखजीवनम्

पाठप्रवेशः

प्रकृतेः सुस्थितौ सर्वेषां सुस्थितिः सम्भवति। सर्वे जन्तवः स्वजीवनाय परस्परम् आश्रयन्ते। आरोग्यसंरक्षणाय हितकरं भोजनम् आवश्यकं भवति। तद्वत् व्यायामश्च। आरोग्यव्यायामप्रतिपादकानि चत्वारि सुभाषितानि पठामः।

## आमुखम्

आधुनिककाले जनानां जीवनशैली बहूनां रोगाणां हेतुर्भवति। आरोग्यसंरक्षणाय रोगाणां प्रतिरोधाय च व्यायामः आवश्यक एव। जीवनशैलीरोगाः भवन्ति प्रमेहः, रक्तातिमर्दः, भाराधिक्यं, हृद्रोग इत्यादयः। जीवनशैलीपरिवर्तनेन एतेषां रोगाणां निवारणं कर्तुं शक्यते।

## -1-

'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' इति प्रथा अस्ति। तद्वत् चिकित्सादेरपेक्षया अन्यैरुपायैः स्वास्थ्यमेव वरम्।

**विनापि भेषजैर्व्याधिः**
**पथ्यादेव निवर्तते।**
**न तु पथ्यविहीनस्य**
**भेषजानां शतैरपि ।।**

### पदच्छेदः

| | | |
|---|---|---|
| प्रक्षालनाद्धि | - | प्रक्षालनात् + हि । |
| विनापि | - | विना + अपि । |
| भेषजैर्व्याधिः | - | भेषजैः + व्याधिः । |
| पथ्यादेव | - | पथ्यात् + एव । |
| शतैरपि | - | शतैः + अपि । |

| अन्वयः | अन्वयार्थः |
|---|---|
| व्याधिः | रोगः |
| भेषजैः विनापि | औषधैः विनापि |
| पथ्यादेव | हितचर्यायाः एव |
| निवर्तते | नश्यते। |
| (सः) तु | स रोगः तु |
| पथ्यविहीनस्य | हितचर्यारहितस्य |
| भेषजानां शतैरपि | अनेकैः औषधैरपि |
| न (निवर्तते।) | न (नश्यते।) |

### भावार्थः

रोगाः प्रायः औषधं विनापि पथ्यादेव विनश्यन्ति। पथ्यविहीनाः तु जनाः बहुभिः औषधैः अपि रोगशान्तिं न लभन्ते।

**कोशः**

व्याधि: - स्त्रीरुग्रुजा चोपतापरोगव्याधिगदामया:। (अमरः)

भेषजम् - भेषजौषधभैषज्यान्यगदोजायुरित्यपि। (अमरः)

**धातुपरिचय:**

निवर्तते - "नि" उपसर्गपूर्वक "वृतु वर्तने" धातो: आत्मनेपदी लट् प्रथमपुरुषैकवचनम्।

**-2-**

आरोग्यमेव परं धनम्। तदर्थं पोषकाः आहारा: अपेक्षिता:। केवलेन हितभोज्येनैव आरोग्यं लभते वा? पुन: किम् आवश्यकम्? व्यायामश्च अपेक्षित:। आरोग्यसंरक्षणे व्यायामस्य आवश्यकतां प्रतिपादयति।

**व्यायामं कुर्वतो नित्यं**
**विरुद्धमपि भोजनम्।**
**विदग्धमविदग्धं वा**
**निर्दोषं परिपच्यते।।**

**पदच्छेदः**

कुर्वतो नित्यम् - कुर्वत: + नित्यम्।

| **अन्वयः** | **अन्वयार्थः** |
| --- | --- |
| नित्यम् | सततम् |
| व्यायामम् | परिश्रमम् |
| कुर्वत: | आचरत: |
| विरुद्धमपि | विपरीतमपि |
| भोजनम् | भक्षणम् |
| विदग्धम् | जीर्णम् |
| अविदग्धं वा | अजीर्णं वा |

| | |
|---|---|
| निर्दोषम् | दोषं विनैव |
| परिपच्यते। | दह्यते। |

**भावार्थः**

प्रतिदिनं व्यायामम् आचरतः जनस्य विरुद्धमपि भक्षणं जीर्णम् अजीर्णं वा भवतु तत् कमपि दोषं विनैव दह्यते।

**कोशः**

भोजनम् - जग्धिस्तु भोजनं , जेमनं लेह-आहारौ निघासो न्याद इत्यपि (अमरः)

**-3-**

आरोग्यशास्त्रानुसारं स्वस्थः कः इति प्रस्तौति।

**समदोषः समाग्निश्च**
**समधातुमलक्रियः।**
**प्रसन्नात्मेन्द्रियमनाः**
**स्वस्थ इत्यभिधीयते।।**

**पदच्छेदः**

समाग्निश्च - समाग्निः + च ।
इत्यभिधीयते - इति + अभिधीयते ।

**विग्रहः**

स्वस्थः - स्वस्मिन् तिष्ठति इति।
समदोषः - समाःदोषाः यस्य सः।
समाग्निः - समः अग्निः यस्य सः।
प्रसन्नात्मेन्द्रियमनाः - आत्मा च इन्द्रियञ्च मनश्च आत्मेन्द्रियमनांसि, प्रसन्नानि आत्मेन्द्रियमनांसि यस्य सः।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| समदोषः | तुल्यत्रिदोषः |

| | |
|---|---|
| समाग्निः | समदहनः |
| समधातुमलक्रियः | सप्तधातूनां समत्वं तथा मूत्रपुरीषादि क्रियाः |
| प्रसन्नात्मेन्द्रियमनाः | प्रसन्नभावत्वेन आत्मा इन्द्रियाणि मनः च यस्य सः। |
| स्वस्थः | आरोग्यवान् |
| इत्यभिधीयते | इति कथ्यते। |

**भावार्थः**

यस्य दोषाः अग्निः मूत्रपुरीषक्रियाः समाः तथा आत्मा मनः इन्द्रियाणि च प्रसन्नानि भवन्ति सः स्वस्थ इत्युच्यते।

**-4-**

वयं किमर्थं खादामः? भोजनस्य प्रयोजनानि कानीति भवन्तः जानन्ति वा? सुश्रुतः स्वस्य ग्रन्थे आहारस्य प्रयोजनानि एवं वदति।

**आहारः प्रीणनस्सद्यो**
**बलकृद्देहधारकः।**
**आयुस्तेजः समुत्साहः**
**स्मृत्तेजोऽग्निविवर्धनः।।**

**पदच्छेदः**

| | | |
|---|---|---|
| प्रीणनस्सद्यो बलकृद्देहधारकः | - | प्रीणनः + सद्यः + बलकृत् + देहधारकः । |
| आयुस्तेजः | - | आयुः + तेजः । |

**विग्रहः**

| | | |
|---|---|---|
| बलकृत् | - | बलं करोतीति। |
| देहधारकः | - | देहधारणं करोति इति। |

| अन्वयः | अन्वयार्थः |
|---|---|
| आहारः | भोजनम् |
| प्रीणनः | तोषदायकः |
| सद्यः | सपदि |

| | |
|---|---|
| बलकृत् | बलदायक: |
| देहधारक: | शरीरधारी |
| आयु: | जीवनकाल: |
| तेज: | द्युति: |
| समुत्साह: | सक्रिय: |
| स्मृति: | स्मरणशक्ति: |
| अग्निवर्धन: | जठराग्निवर्धन: |
| च भवति | च अस्ति। |

**भावार्थ:**

आहार: इन्द्रियाणि प्रसादयति। शीघ्रं बलकारक: भवति। शरीरं धारयति। आयु:, तेज:, ओज:, उत्साहं, स्मृतिशक्तिं, जठराग्निं च वर्धयति।

## पठनप्रवर्तनानि



**तालानुसारं श्लोकानालपतु।**

**श्रद्धेया:अंशाः**

आलपनशैली ।

आशयावबोधः।

उच्चारणस्फुटता।



**श्लोकानामाशयं स्ववाक्यै: लिखतु।**

**श्रद्धेयौ अंशौ**

भाषाशुद्धिः।

आशयावबोधः।



**आरोग्यविषये लघुटिप्पणीं लिखतु।**

**श्रद्धेयाःअंशाः -**

भाषाशुद्धिः।

आशयावगमनम्।

वाक्यघटना।



## श्लोकानां गद्यक्रमं लिखतु।

**श्रद्धेयाःअंशाः**

भाषाशुद्धिः।

आशयावगमनम्।

वाक्यघटना।



## स्वास्थ्यप्रतिपादकानि सुभाषितानि समाहृत्य सम्पुटं निर्मातु।

**श्रद्धेयाःअंशाः**

विषयबन्धितचयनसामर्थ्यम्।

आशयावगमनम्।

क्रमीकरणचारुता।

# पाठः ४ क्षुधा ज्ञानप्रदायिनी

**पाठप्रवेशः**

आरोग्यसंरक्षणाय हितस्य मितस्य च भोज्यस्य प्राधान्यमधिकृत्य पूर्वस्मिन् पाठे वयम् अपठाम खलु। लोके सर्वेभ्यो हितं मितञ्च आहारमुपलब्धं वा? एकवारमपि उदरपूरणं कर्तुमसमर्थाः बहवः जनाः अस्मान् परितस्तिष्ठन्ति। तेषां बुभुक्षां योऽभिजानाति सः जीवनसारं जानाति । अत उच्यते-

क्षुधा परक्लेशविवेकजन्या जानाति यस्तीव्रतरां बुभुक्षाम्।
स एव चात्मानमिवापरं तं पश्यन् महान् वेदविदात्मदक्षः।।

## आमुखम्

गद्यम् पद्यम् इति काव्यसाहित्यं प्रमुखतया द्विविधं भवति। तयोर्मिश्रणेन अपरा काचिद्रचनारीतिश्च प्रसिद्धा भवति चम्पूकाव्यमिति नाम्ना। गद्यपद्यमयं काव्यं चम्पूः इत्यस्ति तल्लक्षणम्। रामायणचम्पूः, भारतचम्पूः, नलचम्पूः, निरनुनासिकचम्पूः, राजसूयचम्पूः, विश्वगुणादर्शचम्पूः इत्यादीनी चम्पूकाव्यानि संस्कृतसाहित्ये प्रसिद्धानि भवन्ति। विश्वेऽस्मिन् सर्वत्रानुभूयमानां बुभुक्षां नाम समस्यामधिकृत्य विरचितं चम्पूकाव्यांशम् अत्र पठामः।

भो मित्राणि,

पश्यन्तु भो सहृदयाः पुरतो लसत्तत्
गेहं सुशान्तमतिनिर्मलमुत्तमार्हम् ।
तत्राङ्गणं प्रविशति प्ररुदन्तमात्म-
जातं निधाय तरुणी सहसा च काचित्।।

विशालस्य तस्य भवनस्य प्रकोष्ठे इदानीं यः कोऽपि नास्त्येव। तथापि विगलितकेशपाशा कृशाङ्गी सा परिम्लानमुखी बुभुक्षया रुदन्तं स्वपुत्रकं वक्षःस्थले निधाय जवेन चत्वरं प्राविशत्। गृहं परितः नेत्रे प्रसार्य गृहान्तरालं साकूतं संवीक्ष्य सा उच्चैरेवमवदत् ।



"मातर्यच्छतु भोज्यं मे
क्षुधा रोदिति पुत्रकः ।
बुभुक्षा तस्य संहर्तु-
मशक्या देहि भोजनम्।।"

ST-263-3-SANSKRIT-(A/S)-9

“भो जन! भोजनं देहि देहि, भो जन ! भोजनं देहि देहि । “

गृहाङ्गणाद् उद्भूतां हृदयद्रवकारिणीं दयनीयां तां याचनां श्रुत्वा ऊनषोडशवर्षीया काचन बाला अन्तरालाद् बहिरागच्छत्। सा तु-

वामहस्ते दुग्धचषकं दक्षिणे हस्ते
पक्वमोचाफलं धृत्वा क्षिप्रकुतुकेन ।
आगता का किमर्थं सा विलपतीति
ज्ञातुमत्र बहिर्द्वारेऽप्यतिष्ठद्बाला।।

तां दृष्ट्वा आगता युवती पुनरवदत् ।“भो जाते ! मम पुत्रोऽयम् असह्यया क्षुधा रोदिति। ह्यस्तने रात्रावपि न किञ्चिदखादत्। अनशनेनार्त्तस्य अर्भकस्यैतस्य लोलमिदं जिह्वाग्रं कमलदलं ग्रीष्मातप इव पुनःपुनः परिशुष्यते । तन्निवारयितुं किमपि कर्तुं न शक्यते मया दरिद्रया । अस्य क्षुधातृप्त्यर्थं किञ्चिदन्नं देहि । अथवा रसनामार्द्रयितुं लेशं नीरं देहि ।“ तयोरेतद्भाषणं श्रुत्वा बहिरागता गृहनायिका बालकस्यास्य दुर्दशां अवगम्य तरलितहृदया विवेकशालिनी चाभवत्। सापि-

मातृवात्सल्यपीयूष-
वर्षणेन कृपामयी ।
सिक्त्वा सपुत्रां युवतीं
क्षणादप्यानयद्गृहम् ।।

असह्यया क्षुधया विलपन्तं तमर्भकं कमलोदरे हंसशिशुमिव स्वहस्तयोः सा कुटुम्बिनी क्षणादेव स्वीचकार। ततस्तं प्रथममेव परिलाल्य अतीव शुष्कमपि विलोलं तस्य जिह्वाग्रं शीतलेन जलेन आर्द्रयितुम् आरभते। तत् दृष्ट्वा हस्तेनैकेन स्वमातरं निवारयन्ती सा बाला एवमवदत् ।

“मा मा जलेन जननि! प्रददातु शीघ्रं
क्षीरं मदीयमधुना चषकस्थितं ते।
पीत्वा जवेन विरलाप्यनुजस्य जिह्वा
पूर्वेव वर्षतु सदा रसदां सुवाणीम्।।”

## पदच्छेदः

| | | |
|---|---|---|
| तत्राङ्गणे | - | तत्र + अङ्गणे। |
| कोऽपि | - | कः + अपि। |
| नास्त्येव | - | न + अस्ति + एव। |
| उच्चैरेवमवदत् | - | उच्चैः + एवम् + अवदत्। |
| मातर्यच्छतु | - | मातः + यच्छतु। |
| बहिरागच्छत् | - | बहिः + आगच्छत्। |
| बहिर्द्वारेऽप्यतिष्ठद्बाला | - | बहिः + द्वारे + अपि + अतिष्ठत् + बाला। |
| पुनरवदत् | - | पुनः + अवदत्। |
| पुत्रोऽयम् | - | पुत्रः + अयम्। |
| रात्रावपि | - | रात्रौ + अपि। |
| किञ्चिदखादत् | - | किञ्चित् + अखादत्। |
| अर्भकस्यैतस्य | - | अर्भकस्य + एतस्य। |
| तन्निवारयितुम् | - | तत् + निवारयितुम्। |
| किञ्चिदन्नम् | - | किञ्चित् + अन्नम्। |
| चाभवत् | - | च + अभवत्। |
| तयोरेतद्भाषणम् | - | तयोः + एतत् + भाषणम्। |
| क्षणादप्यानयद्गृहम् | - | क्षणात् + अपि + आनयत् + गृहम्। |
| हस्तेनैकेन | - | हस्तेन + एकेन। |
| विरलाप्यनुजस्य | - | विरला + अपि + अनुजस्य। |
| पूर्वेव | - | पूर्वा + इव। |

## विग्रहः

| | | |
|---|---|---|
| उत्तमार्हम् | - | उत्तमः अर्हः यस्य सः उत्तमार्हः, तम्।। |
| प्ररुदन्तम् | - | प्रकर्षेण रुदन्तम्। |
| आत्मजातम् | - | आत्मनः जातः, तम्। |

| | | |
|---|---|---|
| विगलितकेशपाशा | - | केशानां पाशः(समूहः) केशपाशः, विगलितः केशपाशः यस्याः सा। |
| कृशाङ्गी | - | कृशानि अङ्गानि यस्याः सा। |
| परिम्लानमुखी | - | परिम्लानं मुखं यस्याः सा। |
| बुभुक्षया | - | भोक्तुम् इच्छा बुभुक्षा, तया। |
| गृहान्तरालम् | - | गृहस्य अन्तरालम्। |
| संवीक्ष्य | - | सम्यक् वीक्ष्य। |
| अशक्या | - | शक्तुम् योग्या शक्या, न शक्या। |
| हृदयद्रवकारिणीम् | - | हृदयं द्रवीकर्तुं शीलं यस्याः सा, ताम्। |
| ऊनषोडशवर्षीया | - | षोडशाद् ऊनम् ऊनषोडशं तदेव वर्षं ऊनषेडशवर्षम्, तद्वयः यस्याः सा। |
| दुग्धचषकम् | - | दुग्धपूर्णं चषकम्। |
| पक्वमोचाफलम् | - | पक्वम् च तत् मोचाफलम् च । |
| असह्यया | - | सोढुं शक्या सह्या, न सह्या असह्या, तया। |
| अनशनेन | - | न अशनम् अनशनम् तेन। |
| जिह्वाग्रम् | - | जिह्वायाः अग्रम्। |
| क्षुधातृप्त्यर्थम् | - | क्षुधायाः तृप्तिः क्षुधातृप्तिः तदर्थम्। |
| गृहनायिका | - | गृहस्य नायिका या सा। |
| तरलितहृदया | - | तरलितं हृदयं यस्याः सा । |
| विवेकशालिनी | - | विवेकेन शालते या सा। |
| मातृवात्सल्यपीयूषवर्षणेन | - | मातुः वात्सल्यम् मातृवात्सल्यम्, तदेव पीयूषम्, तस्य वर्षणेन। |
| सपुत्राम् | - | पुत्रेण सह वर्तते या सा सपुत्रा, ताम्। |
| कमलोदरे | - | कमलस्य उदरम् तस्मिन्। |
| रसदाम् | - | रसं ददाति इति ताम्। |
| सुवाणीम् | - | शोभना च असौ वाणी च सुवाणी, ताम्। |

**कोशः**

| | | |
|---|---|---|
| क्षुत् | - | स्त्री क्षुत् क्षुतं क्षवः पुंसि। |
| अङ्गणम् | - | अङ्गणं चत्वराजिरे। |
| मोचा | - | कदली वारणाबुषा, रम्भा मोचांशुमत्फला। |
| बुभुक्षा | - | अशनाया बुभुक्षा क्षुत्। |
| जिह्वा | - | रसज्ञा रसना जिह्वा। |
| नीरम् | - | अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम्। |

## पठनप्रवर्तनानि



**पाठं सम्यक् पठित्वा भावलयानुसारं चम्पूप्रभाषणं करोतु।**

श्रद्धेयाःअंशाः

आशयावबोधः।

उचितभावः।

भाषाशुद्धिः चम्पूशैली च ।



**पाठभागात् विशेषण-विशेष्याणि विविच्य लिखतु।**

श्रद्धेयौ अंशौ

विशेषणविशेष्यावबोधः।

उचितपदप्रयोगः।



**मातृवात्सल्यपीयूषवर्षणेन सह तया गृहनायिकया युवतीं प्रति कृतं सम्भाषणं सम्भाव्य लिखतु।**

श्रद्धेयाःअंशाः

प्रश्नवाचकपदानां प्रयोगः।

सम्भाषणघटना।

उपचारवाचकानां प्रयोगः।

### पाठस्थानां सम्बोधनरूपाणि चित्वा लिखतु।

श्रद्धेयौ अंशौ

सम्बोधनपदावबोधः।

चयनौचित्यम्।

### कोष्ठकात् समानार्थकपदं चित्वा पूरयत।

**श्रद्धेयौ अंशौ**

आशयावबोधः।

उचितपदचयनम्।

| | | | |
|---|---|---|---|
| | | | अल्पम्। |
| सहसा | - | ...................... | चत्वरम्। |
| क्षुत् | - | ...................... | जलम्। |
| गेहम् | - | ...................... | दुग्धम् । |
| अङ्गणम् | - | ...................... | क्षुधा/ बुभुक्षा। |
| जिह्वा | - | ...................... | रसना। |
| नीरम् | - | ...................... | गृहम्/ भवनम्। |
| क्षीरम् | - | ...................... | जवेन |
| लेशः | - | ...................... | |

## अधिकवाचनांशः

क्षुत् इति स्त्रीलिङ्गरूपं, क्षुतम् इति नपूंसकलिङ्गः। उभयोः बुभुक्षा इत्यर्थः। क्षुत् इति हलन्तशब्दस्य क्षुधा इति भागुरि इत्याचार्यस्य अभिमतेन आकारान्तस्त्रीलिङ्गरूपं च भवति। यथा निट् - निशा , वाक्-वाचा, दिक्-दिशा, रुक्-रुजा।

# पाठः ५



# हितमेवाऽनुयात् सदा।

**पाठप्रवेशः**

राज्ये कुत्रचित् बुभुक्षया यदा केचन क्लेशान् अनुभवन्ति तस्मिन्नेव समये अन्यत्र भोजनप्रदर्शनानि (Food Fest) प्रचलन्ति च। तत्र प्रदर्शितानि सर्वाणि भोज्यानि अस्मभ्यं हितानि इति चिन्तितं वा? यथा बुभुक्षा आरोग्यं बाधते तथा अमितभोजनमपि । एवं चेत् केषांचन भोज्यवस्तूनाम् उपयोगमधिकृत्य विचिन्तयामः।

## आमुखम्

जीवनहेतुकमेव भोजनमिति वयं जानीमः। मानसोल्लासाय अपि भोजनं खादन्तः बहवः अस्मान् परितः सन्ति। विविधरसयुक्तानि, गुणसहितानि, पोषकसमृद्धानि तथा केवलं नयनानन्दप्रदानि च भोजनानि अपि दृश्यन्ते। पाठेऽस्मिन् मातुलेन भोजनं क्रेतुं प्रेषितः प्रवीणः, भोजनशालायाः मातुलं प्रति सन्देशं प्रेषयति। तत्पठामः।


11:02 AM
मम मातुलः
भोजनशालां प्राप्तो वा?
आम् मातुल! भोजनशालां प्राप्तवान्।
भोज्यं क्रीत्वा शीघ्रम् आगच्छतु।
मम संशयोऽस्ति।
कः संशयः?
मातुल! अत्र बहूनि भोज्यानि सन्ति। किं भोज्यं क्रेतव्यम्?
कानि कानि सन्ति ?
सन्देशः

11:03 AM

मम मातुलः

अत्र खाद्यानि, पेयानि, लेह्यानि च सन्ति।

फलानि सन्ति खलु?
कानि कानि फलानि सन्ति?।

आम्। आम्रं, दाडिमं, द्राक्षाफलं, सेवाफलं, बीजपूरकं,
........ इत्यादीनि सन्ति। चित्रं प्रेषयामि ।



सन्देशः

11:03 AM

मम मातुलः

दाडिमं ,आम्रं, सेवाफलं, बीजपूरकं च सर्वं एकैककिलोपरिमितं क्रीणातु।

कस्मात् कारणात् एतानि ?

पश्यतु।

| फलम् | गुणाः |
|---|---|
| आम्रम् | त्वक् संरक्षणाय उपकरोति। |
| दाडिमम् | रक्तसम्मर्दः नियम्यते। |
| द्राक्षाफलम् | रक्तचंक्रमणाय उपकरोति। |
| सेवम् | हृदयारोग्यं दृढयति। |
| बीजपूरकम् | अमितभारं न्यूनीकरोति। |

समीकृताहारत्वेन विविधानां फलानां खादनम् आरोग्याय प्रकल्प्यते।

समीकृताहारो वा? सः कः?

सन्देशः


11:04 AM
मम मातुलः
शरीरस्य कृते मितरूपेण उचितैः पोषकघटकैः युक्तः आहार सः।
आम् । अवगतम् । भोज्यानि क्रेतव्यानि वा?
विशिष्टं किमपि क्रीणातु ।
अहो! भोज्यानि बहुविधानि सन्ति। भोज्यसूचिकां प्रेषयामि।
भोज्यसूचिका
ओदनः पोरोट्टा
रोटिका क्वथितम्
सूत्रापूपम् मीनक्वथितम्
दोशा कुक्कुटाण्डक्वथितम्
मांसोदनम् भ्राष्ट्रमीनम्
घृतोदनम् भ्राष्ट्रमांसम्
सन्देशः


11:05 AM
मम मातुलः
सर्वं भोज्यं समीचीनम् । किन्तु हिताहारः मिताहारः च आरोग्याय कल्प्यते ।
'पोषकसम्पुष्टं भोज्यम् एव खादनीयम्।' इति अध्यापिका अवदत्। स एव वा हिताहारः?
आम्- तदुच्यते "तदेव युक्तं भैषज्यं यदारोग्याय कल्पते" इति ।
आम् समीचीनं भवति। किं क्रेतव्यमिति न सूचितम्।
भक्षणवैविध्यमधिकृत्य जानासि खलु ? यथेच्छं क्रीणातु ।
आम् । अस्तु।
सन्देशः

## विग्रहः

| | | |
|---|---|---|
| दुःस्थितिः | - | दुष्टा स्थितिः। |
| गुणसहितानि | - | गुणैः सहितानि। |
| पोषकसम्पुष्टम् | - | पोषकैः सम्पुष्टम्। |
| हिताहारः | - | हितश्च असौ आहारःच। |
| दुर्लभम् | - | दुःखेन लभ्यते इति। |
| भोज्यम् | - | भोक्तुं योग्यम्। |
| दौर्लभ्यम् | - | दुर्लभस्य भावः । |
| भक्षणदौर्लभ्यम् | - | भक्षणस्य दौर्लभ्यम् । |
| वैविध्यम् | - | विविधस्य भावः। |
| आरोग्यम् | - | अरोगस्य भावः। |
| यथेच्छम् | - | इच्छाम् अनतिक्रम्य। |
| क्रेतव्यम् | - | क्रेतुं योग्यम्। |

## पठनप्रवर्तनानि

**"अमिताहारः आरोग्यस्य हानिकरः" इति विषयमधिकृत्य भित्तिपत्रं रचयतु। कक्ष्यायाम् प्रदर्शयतु।**

**श्रद्धेयाः अंशाः**

भोज्यवस्तूनाम् अभिधाज्ञानम् ।

आकर्षणीयता।

औचित्यम्।

**वैद्येन सह अभिमुखं कृत्वा जीवितशैलीरोगानधिकृत्य लघुटिप्पणीं लिखतु।**

**श्रद्धेयाः अंशाः**

उचितप्रश्नवाचकानामुपयोगः ।

उपचारपदानामुपयोगः।

औचित्यम्।

उचितसाङ्केतिकमाध्यमानाम् उपयोगः।

**अधोदत्तां पट्टिकां पठित्वा आहारपदार्थानां गुणानधिकृत्य लघूपन्यासं लिखतु।**

**भोज्यवैविध्यम्**

| विभागः | गुणाः |
|---|---|
| धान्यकानि (Millets) | प्रमेहरोगः शाम्यते। |
| | जीवितशैलीरोगान् निवारयति। |
| शाकानि | रक्तादिसम्मर्दः नियम्यते। |
| | जीवितशैलीरोगः नियम्यते। |
| मत्स्यः | पेशीनां बलं दृढीकरोति। |
| | अस्थीनां बलं वर्धयति। |
| मांसः | प्रतिरोधशेषिं वर्धयति। |
| | ऊर्जम् उन्मेषं च प्रददाति। |
| अण्डम् | केशान् पोषयति। |
| | नेत्रसंरक्षणं करोति। |

**श्रद्धेयाः अंशाः**

आशयावबोधः ।

वाक्यघटना।

औचित्यम्।

**अधोदत्तयोः एकं सन्दर्भं स्वीकृत्य संभाषणं लिखतु। कक्ष्यायाम् अवतारयतु।**

- क्रेतुः विक्रेतुः च मिथः सम्भाषणम्।
- वैद्यस्य रोगिणः च मिथः सम्भाषणम् । (पथ्याहारमधिकृत्य)

**श्रद्धेयाः अंशाः**

उचितप्रश्नवाचकानामुपयोगः ।

सम्भाषणशैली।

औचित्यम्।

**पाठभागं पठित्वा नाटकरूपेण परिवर्त्य लिखतु। नाटकं कक्ष्यायाम् अवतारयतु। चित्रीकरोतु।**

**श्रद्धेयौ अंशौ**

अवतरणशैली ।

चित्रीकरणपाटवम्।

**पाठभागात् क्त्वान्त-ल्यबन्त-तुमुन्नन्तानि अव्ययानि चित्वा तान्युपयुज्य वाक्यानि रचयतु।**

**श्रद्धेयौ अंशौ**

चयनसामर्थ्यम् ।

वाक्यरचनासामर्थ्यम्।

**'आस्वाद्यकरं भोज्यम् आरोग्यकरं भोज्यम्'- भोजनप्रदर्शनम् आयोजयतु। आहारपदार्थानां पट्टिकां करोतु।**

| | | | |
|---|---|---|---|
| जलम् | लवणितम् | पायसम् | क्वथितम् |
| क्षीरान्नम् | तक्रम् | अवलेहः | शाकान्नम् |
| घृतान्नम् | फलरसम् | कौश्माण्डिकम् | सुपिष्टः |
| चटिका | चिल्लकम् | दधि | नवनीतम् |
| शाकलादः | यवागु | क्षीरम् | अम्लशुण्ठी |

| खाद्यम् | पेयम् | लेह्यम् |
|---|---|---|
| क्षीरान्नम् | दधि | अवलेहः |
| | | |
| | | |
| | | |

**श्रद्धेयौ अंशौ**

वर्गीकरणम्।

उचितक्रमीकरणम् ।

**तव्यत् - यत् प्रत्यययुक्तानि पदानि पाठभागात् चित्वा लिखतु ।**

**उदा- तव्यत् - क्रेतव्यम्　　　　यत् - पेयम्**

**श्रद्धेयः अंशः**

वर्गीकरणम्।

# शब्दकोशः।

| संस्कृतम् | संस्कृतम् | कैरली | कन्नडा | आङ्गलम् |
|---|---|---|---|---|
| अन्तरालम् | अभ्यन्तरम् | ഉൾഭാഗം | ಒಳಭಾಗ | Inside |
| अर्भकः | शिशुः | കുട്ടി | ಮಗು | Child |
| कलिङ्गम् | कलिङ्गम् | തണ്ണിമത്തൻ | ಕಲ್ಲಂಗಡಿ | Watermelon |
| कृशाङ्गी | तन्वङ्गी | മെലിഞ്ഞ സ്ത്രീ | ತೆಳ್ಳಗಿನ ದೇಹ | A lean woman |
| क्रेतव्यम् | क्रेतव्यम् | വാങ്ങേണ്ടത് | ಖರೀದಿಸಬೇಕದು | To be purchased |
| क्षुधा | बुभुक्षा | വിശപ്പ് | ಹಸಿವು | Hunger |
| चत्वरम् | अङ्कणम् | മുറ്റം | ಅಂಗಳ | Courtyard |
| तरुणी | युवतिः | യുവതി | ಯುವತಿ | Young lady |
| दाडिमम् | मातलम् | മാതളനാരകം | ದಾಳಿಂಬೆ | Pomegranate |
| पलाशम् | पत्रम् | ഇല | ಎಲೆ | Leaf |
| प्रकोष्ठः | गृहद्वारम् | കവാടം | ಮನೆಬಾಗಿಲು | Door |
| प्रेषयति | प्रेषयति | അയക്കുന്നു | ಕಳುಹಿಸಲಾಗುತ್ತದೆ | Send |
| बीजपूरकम् | बीजपूरकम् | പേരയ്ക്ക | ಸೀಬೆಹಣ್ಣು | Guava |
| भैषज्यम् | औषधम् | മരുന്ന് | ಔಷಧಿ | Medicine |
| मोचाफलम् | कदलीफलम् | വാഴപ്പഴം | ಬಾಳೆ ಹಣ್ಣು | Banana |

ST-263-4-SANSKRIT-(A/S)-9

| | | | | |
|---|---|---|---|---|
| लेशः | लवः | അൽപ്പം | ಸ್ವಲ್ಪ | A little bit |
| विगलितम् | विकीर्णम् | അഴിഞ്ഞ | ಹರಡಿದ | Loosened |
| शाकलादः | शाकमिश्रः | സലാഡ് | ಸಲಾಡು | Salad |
| साकूतम् | सकौतुकम् | കൗതുകത്തോടെ | ಕುತೂಹಲದಿಂದ | Curiously |

## किमधिगतम्

| पठनप्रवर्तनानि | स्वांशीकृतम् | भागिकतया स्वांशीकृतम् | प्रगतये प्रयत्नः विधेयः |
|---|---|---|---|
| श्लोकान् आलपति | | | |
| आशयं लिखति | | | |
| लघुटिप्पणीं लिखति | | | |
| सुभाषितानां सम्पुटं निर्माति | | | |
| चम्पूप्रभाषणं करोति | | | |
| विशेषणविशेष्याणि लिखति | | | |
| सम्भाषणं रचयति | | | |
| भित्तिपत्रिकां निर्माति | | | |
| नाटकम् अवतारयति | | | |

## क्रियापदपरिचयः

निर्वतते - नि + वृतु वर्तने आत्मनेपदी लट्. प्र.पु.ए.व।
निवर्तते - निवर्तेते - निवर्तन्ते

परिपच्यते - परि+डुपचष् पाके (कर्मणि) आत्मनेपदी लट्. प्र.पु.ए.व।
परिपच्यते - परिपच्येते - परिपच्यन्ते।

अभिधीयते - अभि+डुधाञ् धारणपोषणयोः (कर्मणि)आत्मनेपदि लट् प्र.पु.ए.व।
अभिधीयते - अभिधीयेते - अभिधीयन्ते।

प्राविशत् - प्र + विश् प्रवेशने परस्मैपदी लङ् प्र.पु.ए.व।
प्राविशत् - प्राविशताम् - प्राविशन्।

देहि - डुदाञ् दाने परस्मैपदी लोट् म.पु. ए.व।
देहि/दत्तात् - दत्तम् -ददत।

प्रचलन्ति - प्र+चल गतौ परस्मैपदी लट् प्र. पु. ब. व।
प्रचलति - प्रचलतः - प्रचलन्ति।

दृश्यन्ते - दृशिर् प्रेक्षणे (कर्मणि) आत्मनेपदी लट् प्र. पु. ब. व।
दृश्यते - दृश्येते - दृश्यन्ते।

## मातृका अभ्यासपत्रिका।

**अ) सूचनानुसारम् आरोग्यमधिकृत्य लघुटिप्पणीं लिखत।**

सूचनाः- व्यायामस्य आवश्यकता - समीकृताहारः- स्वास्थ्यम्- जीवनशैली।

**आ) पट्टिकां पूरयतु ।**

घृतान्नम्, क्षीरम्, शाकान्नम्, तक्रम्

| खाद्यम् | पेयम् |
|---|---|
| | |

**इ) क्रियाविशेषणं नामविशेषणं च चित्वा लिखतु।**

क) सुनिर्मले आकाशे श्याममेघाः अतिशीघ्रं गच्छन्ति।

ख) महाकवेः कालिदासस्य महाकाव्यानि अतिसुन्दरं भवन्ति।

**ई) वाक्यात् तव्यत् यत् रूपाणि चित्वा लिखतु।**

क) भो बाल पेयं जलं सर्वदा संरक्षितव्यं भवति।

ख) 'गेयं हरिनानधेयम्' इति चलच्चित्रगानं भवता स्मर्तव्यं वा?

**उ) समानार्थकपदं चित्वा पूरयतु।**

| | | | |
|---|---|---|---|
| क्षुत् | - | .................... | जलम्। |
| गेहम् | - | .................... | दुग्धम् । |
| नीरम् | - | .................... | बुभुक्षा। |
| क्षीरम् | - | .................... | भवनम्। |

**ऊ) आरोग्यसम्बन्धिनीं एकां भित्तिपत्रिकां निर्मातु।**

**ऋ) यथोचितं योजयतु।**

| | |
|---|---|
| क) धान्यकानि | प्रतिरोधशेषिं वर्धयति। |
| ख) मत्स्यः | प्रमेहरोगः शाम्यते। |
| ग) मांसः | अस्थीनां बलं वर्धयति। |
| घ) अण्डम् | केशान् पोषयति। |

# एककम् ३

# कुड्मलम्



## आमुखम्

पल्लवैः पत्रैश्च वर्धमाने संस्कृतपादपे तदनु कुड्मलं जायते। संस्कृतभाषा साहित्यं च कुड्मलनामके अस्मिन्नेकके प्रतिपादितम्। अत्र आर्यभटस्य योगदानमधिकृत्य विवरणात्मकः "**मयूरशिखा**" नामकः पाठः, सौन्दरनन्दकाव्यात् समाकलितः कश्चिदंशयुक्तः "**नियम्यतां स्वयम्**" इति पाठः, तदनु "**गच्छामो वयम्**" इति यात्राविवरणञ्च सन्ति। संस्कृतवाङ्मयपारावारं प्रवेष्टुं बहूपकारकमिदमेककम्।

## पाठः ६

# मयूरशिखा



### पाठप्रवेशः

पूर्वस्मिन् पाठे आधुनिकसङ्केतमुपयुज्य प्रेषितं सन्देशं वयं दृष्टवन्तः खलु। एतादृशानां सन्देशानां प्रेषणे उपग्रहस्य साहाय्यम् अत्यावश्यकं भवति। तर्हि भारतराष्ट्रेण इदम्प्रथमतया विक्षिप्तः उपग्रहः कः? 'आर्यभट्टः' एव किल। भारतस्य प्रसिद्धस्य ज्योतिश्शास्त्रकारस्य आर्यभटस्य स्मरणार्थं तन्नाम दत्तम्। इदानीम् आर्यभटं तस्य योगदानं च अधिकृत्य किञ्चित् पठामः।

## आमुखम्

आर्यभट-ब्रह्मगुप्त-महावीर-भास्कराचार्य-वराहमिहिर-श्रीपतिप्रभृतयः गणितशास्त्रे ज्योतिश्शास्त्रे च विश्रुताः भारतीयाः संख्यावन्तः भवन्ति। भारतीयगणितशास्त्राय तद्वारा लोकगणितशास्त्राय केरलीयानामपि अमूल्यानि योगदानानि सन्ति। केरलीयगणितशास्त्रकारेषु अतिप्रसिद्धाः भवन्ति सङ्गमग्राममाधवः, नीलकण्ठसोमयाजी, पुतुमन चोमातिरि, हरिदत्तः, वटश्शेरि परमेश्वरप्रभृतयः । शून्यस्य आविष्कारेण अङ्कगणिते, बीजगणिते, क्षेत्रगणिते, त्रिकोणमितौ, कलने च भारतस्य नाम उल्लिखितम् एतैः आचार्यैः।



## आर्यभटः

भारते विश्वविख्यातः गणितशास्त्रविशारदः ज्योतिश्शास्त्रपण्डितः च आसीत् आर्यभटः। ४७६ तमे सामान्याब्धे (476 C.E) स भूजातः इति श्रूयते। तस्य पितरौ अधिकृत्य विज्ञानम् इतःपर्यन्तं न लब्धम्। स्वस्य २३ तमे वयसि तेन आर्यभटीयं विरचितम्। कुसुमपुरे उषित्वा सः आर्यभटीयं व्यरचयत् इति प्रशस्तः पारसिकचिन्तकः अल्बरूणि अवदत्। आर्यभटः नलन्दाविश्वविद्यालयस्य कुलपतिः आसीत् इति डि. जि. आप्ते अभिप्रैति ।

ज्योतिश्शास्त्रेण सह गणितशास्त्रे ज्यामितीयसिद्धान्ते बीजगणितसिद्धान्ते च स शास्त्रस्य मार्गदर्शकः आसीत्। अतः १९७५ तमे वर्षे एप्रिल् १९ दिनाङ्के विक्षिप्तस्य उपग्रहस्य 'आर्यभट्ट' इति नाम दत्त्वा भारतसर्वकारेण एते समादृताः। आर्यभटस्य योगदानेन विना भारतीयगणितशास्त्रस्य ज्योतिश्शास्त्रस्य च विचिन्तनं कर्तुं न शक्यते इति चिन्तकाः वदन्ति।

## आर्यभटीयम्

आर्यभटीयम् इत्येकस्य ग्रन्थस्य रचनया स ज्योतिश्शास्त्राय, गणितशास्त्राय च अमूल्यं योगदानं प्रायच्छत्। ग्रन्थोऽयं खगोलशास्त्रेषु मयूरशिखा इव आभाति। आर्यभटीये चत्वारः भागाः सन्ति।

1) गीतिकापादः।
2) गणितपादः।
3) कालक्रियापादः।
4) गोलपादः।

चतुर्षु पादेषु एकविंशत्युत्तरशतं (१२१) कारिकाः वर्तन्ते। त्रयोदशश्लोकयुक्ते गीतिकापादे विविधानि मानानि प्रतिपाद्यन्ते (योजना, हस्तः, अङ्गुलः)। त्रयस्त्रिंशत् श्लोकसहिते गणितपादे ज्यामितीयरूपाणां विस्तीर्णः, शङ्कुच्छाया (നിഴലളവുകൾ) इत्याद्याः वितन्यन्ते। पञ्चविंशतिश्लोकयुक्ते कालक्रियापादे कालचक्रम्, सौरवर्षम्,

चान्द्रमासः, नक्षत्रदिनम्, चान्द्रदिनम् इत्यादीनि विस्तरेण प्रतिपाद्यन्ते। पञ्चाशत् श्लोकसहिते गोलपादे खगोलशास्त्रं प्रतिपादयति। नक्षत्राणां ग्रहाणां सञ्चारमार्गं च तत्र प्रस्तौति आचार्यः। आर्यभटीयम् इति एकेनैव ग्रन्थेन ज्योतिश्शात्रनभसि तथा गणितशास्त्रमण्डले देदीप्यमानः आर्यभटः ५५० तमे सामान्याब्दे (550 C.E) पञ्चत्वं गतः।

**पदच्छेदः**

| | | |
|---|---|---|
| चान्द्रगवेषणपद्धतिरेव | - | चान्द्रगवेषणपद्धतिः + एव। |
| तन्नाम | - | तत् + नाम। |
| इत्यादयः | - | इति +आदयः। |
| केरलस्यापि | - | केरलस्य +अपि। |
| आदृतोऽयम् | - | आदृतः + अयम्। |
| इत्येकस्य | - | इति +एकस्य। |
| एकेनैव | - | एकेन + एव। |

**विग्रहः**

| | | |
|---|---|---|
| केरलीयगणितशास्त्रकाराः | - | केरलीयाः च अमी गणितशास्त्रकाराः च। |
| भूजातः | - | भुवि जातः। |
| कालचक्रम् | - | काल एव चक्रम्। |
| सौरवर्षम् | - | सौरं च तत् वर्षं च। |
| चान्द्रमासः | - | चन्द्रस्य अयं चान्द्रः। चान्द्रः च असौ मासः च। |
| सञ्चारमार्गं | - | सञ्चारस्य मार्गः, तम् । |

# पठनप्रवर्तनानि



**पाठभागं पठित्वा केरलीयगणितशास्त्रकाराणाम् इतरगणितशास्त्रकाराणां च नामानि विविच्य पट्टिकां करोतु।**

| केरलीयाः | अन्ये |
| --- | --- |
| | |

**श्रद्धेयौ अंशौ**

वर्गीकरणम्।

उचितक्रमीकरणम् ।



**सूचनानुसारं जीवनचरितं लिखतु।**

<u>सूचनाः</u>

| | | |
| --- | --- | --- |
| नाम | - | सङ्गमग्राममाधवः। |
| जन्म | - | १३४० तमे वर्षे, केरलम्, इरिङ्ङालक्कुटा। |
| योगदानम् | - | अनन्तश्रेणी, त्रिकोणमितिः, बीजगणितम्। |
| कृतयः | - | वेण्वारोहः, स्फुटचन्द्राप्तिः, अगणितपञ्चाङ्गम्, अगणितग्रहाचारम्। |
| मृतिः | - | १४२५ तमे वर्षे। |

**श्रद्धेयाः अंशाः**

आशयावबोधः।

वाक्यघटना।

जीवचरित्रघटना।

**पाठभागं पठित्वा प्रसिद्धः , पण्डितः, इत्येतयोः समानार्थकशब्दान् चित्वा लिखतु।**

**श्रद्धेयौ अंशौ**

वर्गीकरणम्।

उचितक्रमीकरणम् ।

**उदाहरणानुसारं वाक्यं परिवर्त्य लिखतु।**

उदाहणम्

**<u>जलस्य</u>** विना स्नातुं न शक्यते। **<u>जलेन</u>** विना स्नातुं न शक्यते।

क) **पुस्तकस्य** विना पठितुं यतते। ................................।

ख) **वाहनस्य** विना सञ्चरितुं प्रेरयति। ................................।

ग) **उपनेत्रस्य** विना वाचयति। ................................।

घ) **आहारस्य** विना जीवितुं न शक्यते। ................................।

ङ) **तूलिकायाः** विना लेखितुं न शक्यते। ................................।

**श्रद्धेयौ अंशौ**

आशयावबोधः।

उचितविभक्तिप्रयोगः।

**पाठभागं पठित्वा आर्यभटीयम् अधिकृत्य लघूपन्यासं लिखतु।**

**श्रद्धेयाः अंशाः**

आशयावबोधः।

वाक्यघटना।

भाषाशुद्धिः।

## अधिकवाचनांशः

### कोशः

धीरो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः।(अमरकोशः)

विद्वत्सुप्रगल्भौ विशारदौ। (अमरकोशः)

प्रथितप्रख्यातवित्तविज्ञातविश्रुताः।(अमरकोशः)

### व्याकरणविशेषः

पृथग्विनानानाभिस्तृतीयान्यतरस्याम्। (अष्टाध्यायी-2.3.32)

अनेन सूत्रेण विना शब्दयोगे द्वितीया, तृतीया, पञ्चमी विभक्तयः च प्रवर्तन्ते।

यथा श्रमं विना- श्रमेण विना- श्रमाद्विना न फलप्राप्तिः।

| | |
|---|---|
| अङ्कगणितम् | - Arithmetic |
| बीजगणितम् | - Algebra |
| क्षेत्रगणितम् | - Geometry |
| त्रिकोणमितिः | - Trigonometry |
| कलनम् | - Calculus |

| शास्त्रकाराः | ग्रन्थः | योगदानम् |
|---|---|---|
| आर्यभटः | आर्यभटीयम् | बीजगणितम्, ज्यामितिः। |
| ब्रह्मगुप्तः | ब्रह्मस्फुटसिद्धान्तः | गोलव्याप्तसमवाक्यम्। |
| महावीरः | गणितसारसङ्ग्रहः | अङ्कगणितम्, बीजगणितम्। |
| भास्कराचार्यः | महाभास्करीयम्, लघुभास्करीयम् | स्थानसंख्या। |
| वराहमिहिरः | बृहत्संहिता | त्रिकोणमितिः। |
| श्रीपतिः | गणिततिलकम् | बीजगणितम्। |
| सङ्गमग्राममाधवः | वेण्वारोहः | बीजगणितम्, त्रिकोणमितिः, कलनम्। |
| नीलकण्ठसोमयाजी | तन्त्रसंग्रहः | अभिन्नसंख्या। |
| पुतुमन चोमातिरि | वेण्वारोहाष्टकम् | त्रिकोणमितिः, कलनम्। |
| हरिदत्तः | महामार्गनिबन्धनम् | परहितपद्धतिः। |
| वटश्शेरि परमेश्वरः | दृग्गणितम् | ग्रहसञ्चारगणितपद्धतिः। |
| तृक्कण्टियूर् अच्युतपिषारोटिः | उपरागक्रियाक्रमः | गणितम्। |

# पाठः ७

# नियम्यतां स्वयम्

**पाठप्रवेशः**

मानवानां प्रगत्यै योगक्षेमाय च भवन्ति सर्वाणि शास्त्राणि । परन्तु तेषाम् आत्यन्तिकलाभः जीविनां सौख्यमेव । काव्यादीनाम् अध्ययनस्यापि लक्ष्यमेतदेव। मानसोल्लासविवर्धनाय उपयुक्तानि उपदेशरूपाणि कानिचन पद्यानि पठामः ।

## आमुखम्

पञ्चमहाकाव्यानि संस्कृतसाहित्ये अतिप्रसिद्धानि भवन्ति। तेभ्यो महाकाव्येभ्यः पूर्वं कानिचन काव्यानि विरचितानि भवन्ति। तेषु महाकाव्येषु अश्वघोषस्य **सौन्दरनन्दं** रचनारीतेः लालित्येन अर्थपुष्ट्या च सुप्रसिद्धं भवति। काव्यमिदं विदेशेष्वपि भाषान्तरीकृत्य प्रचलितमस्ति। बुद्धधर्मप्रचारणाय विरचितेऽस्मिन् महाकाव्ये अष्टादश सर्गाः सन्ति। तत्र मनःसंयमनस्य आवश्यकताम् अधिकृत्य बहवः उपदेशाः विद्यन्ते। तत्रस्थान् कांश्चन श्लोकान् पठामः ।

निश्रेयसद्योतकः हितकरोऽपि उपदेशः श्रवणसमये श्रोतृषु अप्रियत्वं जनयति इति दृष्टान्तेन कथयति-

अनिष्टमप्यौषधमातुराय
ददाति वैद्यश्च यथा निगृह्य ।
तद्वन्मयोक्तं प्रतिकूलमेत-
त्तुभ्यं हितोदर्कमनुग्रहाय ।।
*(सर्गः५, श्लोकः ४८ )*



**पदच्छेदः**

| | | |
|---|---|---|
| अप्यौषधम् | - | अपि + औषधम् । |
| वैद्यश्च | - | वैद्यः + च। |
| तद्वन्मयोक्तम् | - | तद्वत् + मया + उक्तम्। |

**विग्रहः**

| | | |
|---|---|---|
| अनिष्टम् | - | न इष्टम् । |
| हितोदर्कम् | - | उदर्के हितम्। |

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| यथा | - | येन प्रकारेण |
| वैद्यः | - | चिकित्सकः |
| आतुराय | - | रोगिणे |
| अनिष्टमपि | - | अप्रियम् अपि |
| औषधम् | - | भेषजम् |
| निगृह्य | - | बलात्कारेण |
| ददाति | - | प्रयच्छति |
| तद्वत् | - | तथा |
| मया | - | मया (अत्र उपदेशकेन इति आशयः) |
| यदुक्तम् | - | यद् उपदेशरूपेण कथितम् |
| एतत् | - | सः उपदेशः |
| प्रतिकूलं भवति। | - | श्रवणसुखं न जनयति। |
| तुभ्यम् | - | भवते (सः उपदेशः) |

| | | |
|---|---|---|
| हितोदर्कम् | - | भाविनि हितकरः (तथा) |
| अनुग्रहाय च भवति। | - | अनिष्टनिवारकः अभीष्टदायकश्च भवति। |

**भावार्थः**

रोगी अप्रियं प्रकटयन्नपि रोगशमनौषधं चिकित्सकः बलेन तं पाययति। तथा मम उपदेशवाक्यानि भवते इदानीं श्रवणपरुषाण्यपि पश्चात् हितकराणि अनुग्रहप्रदायकानि च भविष्यन्ति।

**कोशः**

उदर्कः - उदर्कः फलमुत्तरम् - इत्यमरः। (भविष्यत्कालार्थे)

* * *

**आयुरारोग्यमृत्युरूपाः त्रिदोषाः यावत् न बाधन्ते तस्मात्पूर्वं श्रेयस्कराणि कार्याणि करणीयानि इत्युपदिशति।**

**तद्यावदेव क्षणसन्निपातो**
**न मृत्युरागच्छति यावदेव ।**
**यावद्वयो योगविधौ समर्थं**
**बुद्धिं कुरु श्रेयसि तावदेव ॥** (सर्ग :५ , श्लोक :४९)

**पदच्छेदः**

| | | |
|---|---|---|
| तद्यावदेव | - | तत् + यावत् + एव। |
| क्षणसन्निपातो न | - | क्षणसन्निपातः + न। |
| तावदेव | - | तावत् + एव। |
| मृत्युरागच्छति | - | मृत्युः + आगच्छति। |
| यावद्वयो योगविधौ | - | यावत् + वयः+ योगविधौ। |

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| तत् यावदेव | - | अतः यस्मिन् एव काले |
| क्षणसन्निपातः | - | कतिपयमुहूर्त्तानां समाहाररूपः (आयुः स्थास्यति -इति शेषः) |
| यावदेव मृत्युः | - | यस्मिन् एव काले मरणम् |
| न आगच्छति | - | न प्राप्नोति |
| यावद् वयः | - | यः बाल्यादयः कालाः |
| योगविधौ समर्थः | - | योगाभ्यासं कर्तुं समर्थः (भवति) |
| तावदेव | - | तस्मिन् एव काले |
| श्रेयांसि | - | श्रेयस्कराणि कर्माणि प्रति |
| बुद्धिं कुरु। | - | स्वमतिं योजयतु। |

**भावार्थः**

यावत्कालपर्यन्तम् अनेकक्षणानां समाहाररूपम् आयुः तिष्ठति, यावदेव मृत्युः नागच्छति, यावत्कालं योगाभ्यासं कर्तुं शरीरः समर्थः भवति, तस्मिन्नेव काले श्रेयस्कराणि कर्माणि कर्तुं बुद्धिं करोतु।

* * *

**शरीरं सर्वथा अनित्यं भवति । अतः स्वकीये बलविषये अहङ्कार: न कार्य:।**

**यदान्नपानासनयानकर्मणा-**
**मसेवनादप्यतिसेवनादपि ।**
**शरीरमापन्नविपत्ति दृश्यते**
**बलेऽभिमानस्तव केन हेतुना ॥** (सर्गः९, श्लोकः७)

**पदच्छेदः**

| | | |
|---|---|---|
| यदान्नपानम् | - | यदा + अन्नपानम्। |
| असेवनादप्यतिसेवनादपि | - | असेवनात् + अपि + अतिसेवनात् + अपि। |
| बलेऽभिमानस्तव | - | बले + अभिमानः+ तव। |

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| यदा | - | यस्मिन् काले |
| अन्नपानासनयानकर्मणाम् | - | भोजनस्य, पानस्य, उपवेशनस्य, यानस्य च |
| असेवनात् अपि | - | अनुपयोगेन (तथा) अपि |
| अतिसेवनात् अपि | - | अमितोपयोगेन अपि |
| शरीरम् | - | आत्मनः देहम् |
| आपन्नविपत्तिः | - | आसन्ननाशम् (इति) |
| दृश्यते | - | द्रष्टुं शक्यते। (एवं शरीरनाशे प्रत्यासन्नेऽपि) |
| तव केन हेतुना | - | भवतः केन कारणेन |
| बले अभिमानः (भवति) ? | - | स्वशक्तौ अहङ्कारः भवति ? |

**भावार्थः**

अन्नपानादीनां व्यायामविश्रमादीनां च अभावेनापि तथा तेषाम् अमितोपयोगेनापि शरीरं नाशं प्राप्नोति। एवं स्थिते सर्वथा दुर्बलस्य नाशोन्मुखस्य शरीरस्य शक्तौ किं निमित्तं मानवः अहङ्करोति ?

* * *

**परस्पराश्रयत्वं विना कस्यापि केवलम् आत्मनः बलेन एव यत् किमपि कर्तुं न शक्यते इति दृष्टान्तैः समर्थयति।**

**यदा हिमार्तो ज्वलनं निषेवते**
**हिमं निदाघाभिहतोऽभिकाङ्क्षति ।**
**क्षुधान्वितोऽन्नम् सलिलं तृषान्वितो**
**बलं कुतः? किं च? कथं च? कस्य च ?** (सर्गः९,श्लोकः१५)

**पदच्छेदः**

हिमार्तो ज्वलनम् - हिमार्तः + ज्वलनम्।
निदाघाभिहतोऽभिकाङ्क्षति - निदाघाभिहतः + अभिकाङ्क्षति।
क्षुधान्वितोऽन्नम् - क्षुधान्वितः + अन्नम्।

**विग्रहः**

हिमार्तः - हिमेन आर्तः।
निदाघाभिहतः - निदाघेन अभिहतः।
क्षुधान्वितः - क्षुधया अन्वितः।
तृषान्वितः - तृषया अन्वितः।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| यदा | - | यस्मिन् काले |
| हिमार्तः | - | शैत्येन पीडितः |
| ज्वलनं निषेवते | - | अग्निं शरणं प्राप्नोति, |
| निदाघाभिहतः अपि | - | ग्रीष्मातपेन क्लान्तः अपि |
| हिमं (निषेवते ) | - | शीतोपचारम् इच्छति, |
| क्षुधान्वितः | - | बुभुक्षया क्लिन्नः |
| अन्नम् (निषेवते) | - | अन्नम् आश्रयते। |

| | | |
|---|---|---|
| तृषान्वितः | - | पिपासाकुलः |
| सलिलं (निषेवते) | - | जलम् अन्विष्यति |
| (तदा) बलं कुतः | - | तस्मिन् काले बलं कुत्रास्ति, |
| किञ्च कथं च | - | बलं कियदस्ति, कथमस्ति, |
| कस्य च (अस्ति)? | - | कस्यास्ति बलम्? |

**भावार्थः**

हिमशैत्येन दुःखितः अग्निं संसेवते। ग्रीष्मातपक्लिष्टस्तु शीतोपचारम् अभिलषति। क्षुधया पीडितस्तु भोजनमिच्छति। पिपासाकुलोऽपि जलम् ईहते। एवम् आत्मनः क्लेशनाशाय अपरान् आश्रयते चेत् अस्य बलं कियदस्ति, अनेन किं प्रयोजनम्? अनेन बलेन न कोऽपि लाभः इत्याशयः।

* * *

**त्वं बलवान् असि चेत् तावत् प्रथमम् अत्मनियन्त्रणं कुरु इति निर्दिशति।**

**बलं महद्वा यदि येन मन्यसे**
**कुरुष्व युद्धं सह तावदिन्द्रियैः ।**
**जयश्च तेऽत्रास्ति महच्च ते बलं**
**पराजयश्चेत् वितथं च ते बलम् ॥** (सर्गः९,श्लोकः२२॥)

**पदच्छेदः**

| | | |
|---|---|---|
| महद्वा | - | महत्+ वा। |
| तावदिन्द्रियैः | - | तावत् + इन्द्रियैः। |
| जयश्च | - | जयः+ च। |
| तेऽत्रास्ति | - | ते+ अत्र + अस्ति। |
| महच्च | - | महत् + च। |

पराजयश्चेत् - पराजयः + चेत्।

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| येन | - | येन केनापि हेतुना |
| बलं महद् वा | - | आत्मनो बलं महत्तरम् इति |
| मन्यसे यदि | - | चिन्तयसि चेत् |
| तावद् | - | तस्मिन्नेव समये |
| इन्द्रियैः सह | - | आत्मनः इन्द्रियैः सह |
| युद्धं कुरुष्व । | - | समरं कुरुष्व। |
| अत्र जयः | - | इन्द्रियसंयमने विजयम् |
| अस्ति चेत् | - | लभते चेत् |
| ते बलम् | - | त्वदीयं बलम् |
| महत् । | - | महत्तरमिति वक्तुं शक्यते। |
| पराजयः चेत् | - | (अथवा) पराजयः भवति चेत् |
| ते बलम् | - | त्वदीयं बलम् |
| वितथं च (अस्ति)। | - | निष्फलं च अस्ति। |

**भावार्थः**

येन केनापि कारणेन आत्मनः शक्तिम् अधिकृत्य अभिमानः अस्ति चेत् प्रथममेव इन्द्रियजयं लब्धुं प्रयत्नः करणीयः। इन्द्रियसंयमने सिद्धे स्वकीयं बलं महत्तरं भवति। अथवा इन्द्रियजये अशक्तश्चेत् एतादृशं बलं निष्फलमेव।

# पठनप्रवर्तनानि



## पाठभागस्थानि पद्यानि ताललयानुसारम् आलपतु।

श्रद्धेयाः अंशाः

उच्चारणस्फुटता।

आशयव्यक्तता।

तालबोधः।



## नवीनपदानि चित्वा आशयं लिखतु।

श्रद्धेयाः अंशाः

औचित्यम्।

आशयव्यक्तता।

आशयग्रहणसामर्थ्यम्।



## पद्यानां गद्यक्रमं लिखतु।

श्रद्धेयाः अंशाः

औचित्यम्।

आशयव्यक्तता।

वाक्यघटना।



## पद्यानाम् आशयं लिखतु।

श्रद्धेयाः अंशाः

औचित्यम्।

आशयावगमनम्।

वाक्यघटना।



## इष्टतमस्य पद्यस्याशयम् उपन्यासरूपेण लिखतु।

श्रद्धेयाः अंशाः

उपन्यासघटना।

आशयव्यक्तता।

वाक्यघटना।

# अनुबन्धप्रवर्त्तनम्

**प्राचीनकवीनां काव्यानां च नामानि पट्टिकारूपेण लिखतु।**

| कर्ता | कृतिः |
| --- | --- |
| अश्वघोषः | बुद्धचरितम्, सौन्दरनन्दम् |
| प्रवरसेनः | सेतुकाव्यम्, सेतुबन्धम्, रावणवधम् |
| बुद्धघोषः | पद्यचूडामणिः |
| कुमारदासः | जानकीहरणम् |
| भट्टिः | भट्टिकाव्यम्/रावणवधम् |
| हरिचन्द्रः | धर्मशर्माभ्युदयम् |
| रत्नाकरः | हरिविजयम् |
| वासुदेवः | नलोदयम् |
| पद्मगुप्तः | नवसाहसाङ्कचरितम् |
| बिल्हणः | विक्रमाङ्कदेवचरितम् |
| क्षेमेन्द्रः | रामायणमञ्जरी, भारतमञ्जरी, बृहत्कथामञ्जरी |

## पाठः ८

# गच्छामो वयम्




**पाठप्रवेशः**

अध्ययनापेक्षया मानसोल्लासाय प्रायेण सर्वे यात्रामपि कुर्वन्ति। भवन्तः कुत्रापि विनोदयात्रां कृतवन्तः किम्? यात्रां कृत्वा यात्राविवरणं के के लिखन्ति? एकं यात्राविवरणं पठामः।

## आमुखम्

प्राचीनकालादारभ्य मानवाः अन्वेषणकुतुकिनः भवन्ति। तेषाम् औत्सुक्यस्य किञ्चनोदाहरणं भवति यात्रा। यात्राः मनोरञ्जिकाः सुखदायिकाश्च भवन्ति। यात्रया विविधदेश- भाषा - संस्कृतीः ज्ञातुं शक्यते। इदानीम् एकं यात्राविवरणं पठामः। संस्कृतभाषां पठन्त्याः छात्रायाः राधिकायाः दैनिकीं पश्यामः।

अद्य प्रभाते अत्युत्साहेन उत्थाय पठनयात्रायै अहं विद्यालयम् अगच्छम्। अस्माकम् आगमनात्पूर्वमेव अध्यापकाः समागताः आसन्। सप्तवादने वयं विद्यालयात् प्रस्थिताः। फिदा, आन्मरिया च मया साकम् उपाविशताम्। यात्रामध्ये सर्वे गीतनृत्यादिभिः अत्यधिकं सन्तुष्टाः अभवन्। यदा वयं तृशिवपुरनगर्याः राजमार्गं प्रविष्टाः तदैव पूरमहोत्सवस्य तथा गजराजानां च अविस्मरणीयं दृश्यं मनसि समायाति स्म। बालारुणस्य सुवर्णकिरणैः समलङ्कृतानि वटक्काञ्चेरी प्रदेशस्थानि व्रीहिक्षेत्राणि ग्रामीणसौकुमार्यं द्विगुणीकुर्वन्ति।






अनन्तरम् अत्रत्यं प्रशान्तसुन्दरं वातावरणं केरलकलामण्डलं प्रविष्टानस्मान् स्वीचकार। अत्र भेदभावनां विना सर्वासां कलानाम् अनुशीलनाय सर्वे समर्थाः भवन्तीति ज्ञानं महतः सन्तोषस्य विषयः। अधुना कल्पितसर्वकलाशालारूपेण विकसितेऽस्मिन् कलालये कथकळि, मोहिनियाट्टम्, कूटियाट्टम्, भरतनाट्यम्, तुळ्ळल्, पञ्चवाद्यम् इत्यादीनि कलारूपाणि अभ्यसितुं देशविदेशेभ्यः छात्राः समायान्ति। तैः कलाछात्रैः सह मिथो भाषणेन मम मनसि कलापठनाय अतीव तात्पर्यम् अजायत। कूत्तम्पलस्य वैशिष्ट्यम् आकर्ण्य विस्मयीभूताः वयं कूत्तम्पलं,



पुरावस्तुकेन्द्रं, चतुष्षष्टिकलानां विवरणात्मकं चलच्चित्रं च अपश्याम। कलामण्डलस्य भित्तिकासु अङ्कितानि नानावर्णानि भित्तिचित्राणि चित्रकलायाः गरिमानं विवृण्वन्ति। अपि च विविधासु कलासु विराजितानां महारथानां छायाचित्राणि एकस्मिन् प्रकोष्ठे क्रमशःविन्यस्तानि दृष्ट्वा केषां वा मनस्सु कौतुकं न पुष्णाति?

तदनु निलानद्याः पुलिनेषु विराजमानं वल्लत्तोल् स्मृतिमन्दिरम् अपश्याम। वल्लत्तोल् महाशयस्य अन्त्यविश्रमस्थानमिदं कलामण्डलस्य प्राक्तनमन्दिरम् आसीत् । एतन्मन्दिरं यद्यपि पौराणिकं तथापि विशिष्टं रमणीयं च वर्तते ।

लघुभोजनानन्तरं निलापुलिने उपविश्य वयम् 'अन्त्याक्षरी', 'अभिनयेन चलच्चित्रनामकथनक्रीडा' इत्यादिभिः सामोदं कालम् अयापयामः। तस्मिन्नवसरे निलानद्याः प्राधान्यं मामाङ्कस्य ऐतिह्यं च अधिकृत्य अध्यापिका प्रत्यपादयत्। निलां प्रणम्य अस्तमयसूर्यस्य मनोहारितां च नेत्रैः निपीय प्रतिनिवृत्ताः।



विद्यालये अस्मान् प्रतीक्ष्य रक्षितारः आसन्। मात्रा साकं गृहं प्राप्य अहं यात्रायाः मधुरानुभवैः तान् अभ्यनन्दयम्।

**पदच्छेदः**

किञ्चनोदाहरणम् - किञ्चन + उदाहरणम्।

विकसितेऽस्मिन् - विकसिते + अस्मिन्।
मिथो भाषणेन - मिथः + भाषणेन।
एतन्मन्दिरम् - एतत् + मन्दिरम्।
तस्मिन्नवसरे - तस्मिन् + अवसरे।
शक्यत इति - शक्यते + इति।

**विग्रहः**

औत्सुक्यस्य - उत्सुकस्य भावः औत्सुक्यं, तस्य।
आनन्दपूरिताः - आनन्देन पूरिताः।
राजमार्गं - राज्ञः मार्गः राजमार्गः, तम् ।
सुवर्णकिरणैः - सुवर्णसन्निभैः किरणैः।
सुखदायिका - सुखं ददाति या सा ।
पठनयात्रा - पठनाय यात्रा।
बालारुणस्य - बालः च असौ अरुणःबालारुणः, तस्य।
प्रशान्तसुन्दरं - प्रशान्तं च सुन्दरं च।
ग्रामीणसौकुमार्यम् - ग्रामस्य इदं ग्रामीणं,सुकुमारस्य भावः सौकुमार्यं, ग्रामीणं च तत् सौकुमार्यं च।
मनोहारिताम् - मनांसि हर्तुं शीलम् अस्य इति मनोहारी, तस्य भावः मनोहारिता, ताम्।

## पठनप्रवर्तनानि।

**इष्टतमयात्रायाः दैनिकीं रचयतु।**

श्रद्धेयाः अंशाः

वाक्यघटना।
आशयव्यक्तता।
आकर्षणीयता ।
संस्मरणसामर्थ्यम्।

**विविधकलारूपाणां चित्राणि समाहृत्य चित्रसञ्चयम्/अङ्कीय चित्रसञ्चयम् (Digital Album) सज्जीकरोतु।**

श्रद्धेयौ अंशौ

सञ्चयनसामर्थ्यम्।

आकर्षणीयता ।

**उदाहरणमनुसृत्य विद्यालयीयविनोदयात्रायै यात्रासूचीं रचयतु।**

यात्रासूची (Itinerary)

८.०० विद्यालयतः प्रस्थानम्।

९.०० प्रभातभोजनम्।

१०.०० कलामण्डलप्राप्तिः, कूत्तम्पलदर्शनम्।

१२.३० वल्लत्तोळ् स्मृतिभवनम्, छायाचित्रप्रदर्शनम्।

१.१५ मध्याह्नभोजनम्।

३.०० निलापुलिनम्।

४.०० लघ्वशनपानम्।

६.०० प्रत्यागमनम्।

**श्रद्धेयौ अंशौ**

संक्षिप्तता।

समयक्रमः।

**उदाहरणानुसारं 'यद्यपि तथापि' उपयुज्य वाक्यं परिवर्तयतु।**

**उदा-** रमेशः परीक्षायां पराजितः संवृत्तः। सः प्रयत्नं न त्यजति।

**यद्यपि** रमेशः परीक्षायां पराजितः संवृत्तः **तथापि** प्रयत्नं न त्यजति।

- वृष्टिः भवति। बालकाः क्रीडाङ्कणे क्रीडन्ति।
- मम वेतनं न्यूनं भवति। अहं धनसञ्चयं करोमि।
- ज्वरः अस्ति। सः गृहकार्यं करोति।

**चित्रं दृष्ट्वा लट्, लङ्, लृट् वाक्यानि मातृकानुसारं लिखतु।**
**यात्रानुभवस्य विवरणात्मकवीडियो सज्जीकृत्य अवतारयतु।**




| | | |
|---|---|---|
| लट् (वर्तमानकालः) | - | विनीतः दैनिकीं लिखति। |
| लङ् (भूतकालः) | - | विनीतः दैनिकीम् अलिखत्। |
| लृट् ( भविष्यत्कालः) | - | विनीतः दैनिकीं लेखिष्यति। |
| लट् | - | ............................................... |
| लङ् | - | ............................................... |
| लृट् | - | ............................................... |

**श्रद्धेयाः अंशाः**

ह्रस्ववीडियो।

आख्यानशैली।

आकर्षणीयता ।

## अधिकविस्तरः

### वल्लत्तोल् नारायणमोनोन्




कैरल्याम् आधुनिककवित्रये अन्यतमः भवति वल्लत्तोल् नारायणमेनोन् महाशयः। तस्य जन्म १८७८ ओक्टोबर् मासस्य १६ दिनाङ्के मलप्पुरं जिल्लायां मङ्गलं देशे अभवत्। तस्य पितरौ कटुङ्ङोट्ट् मल्लिश्शेरी दामोदरन् इलयत् कुट्टिप्पारु अम्मा च भवतः। स्वस्य द्वादशतमे वयसि सः काव्यरचनामारब्धवान्। सः चित्रयोगम् इति महाकाव्यस्य रचनया महाकविः इति प्रसिद्धोऽभवत्। सः स्वतन्त्रतासंग्रामे प्रवृत्तः मलयालकविः आसीत्। ऋग्वेदः, पुराणानि, वाल्मीकिरामायणं च सः कैरल्यां विवर्तनमरकोत्। वाल्मीकिरामायणस्य कैरलीविवर्तनेन केरलवाल्मीकिः इत्यपरनामापि सः प्राप्तवान्। तेन विरचितानि खण्डकाव्यसमाहाराणि भवन्ति शिष्यनुं मकनुम्, एन्टे गुरुनाथन्, दिवास्वप्नम्, मग्दलनमरियम्, बधिरविलापः इत्यादीनि। कोच्चिमहाराजस्य मुकुन्दराजस्य साहाय्येन वल्लत्तोल् महाशयः १९३० तमे वर्षे केरलकलामण्डलं समस्थापयत्। पद्मविभूषणं, कविसार्वभौमः इत्यादिभिः पुरस्कारैः समादृतः अयं महात्मा । तस्य अशीतितमे वयसि १९५८ मार्च् मासस्य १३ दिनाङ्के दिवङ्गतः।

## कूत्तम्पलम्।

भरतमुनेः नाट्यशास्त्रानुसारं निर्मितं नाट्यगृहं भवति कूत्तम्पलम्। कलामण्डलस्य कूत्तम्पलस्य स्तम्भेषु १०८ नाट्यकरणानि चित्रीकृतानि सन्ति। तत्र कूत्त्, कूटियाट्टम् इत्यादीनि केरलीयानि अनुष्ठानकलारूपाणि अवतारयन्ति।

## शब्दकोशः।

| संस्कृतम् | संस्कृतम् | कैरली | कन्नडा | आङ्गलम् |
|---|---|---|---|---|
| अनुशीलनम् | प्रशिक्षणम् | പരിശീലനം | ತರಬೇತಿ | Training |
| कलनम् | गणनम् | ഗണനം | ಗಣನೆ | Calculation |
| कुड्मलम् | मुकुलम् | പൂമൊട്ട് | ಮೊಗ್ಗು | Bud |
| देदीप्यमानः | शोभायमानः | ശോഭിക്കുന്ന | ಹೊಳೆಯುವ | Shining |
| नियम्यताम् | नियन्त्रणम् क्रियताम् | നിയന്ത്രി- -ക്കപ്പെടണം | ನಿಯಂತ್ರಿಸಬೇಕ್ಕು | Must be con- trolled |
| पारसिकः | पेर्ष्या राष्ट्रस्थः | പേർഷ്യക്കാരൻ | ಪೇರ್ಷ್ಯ ದೇಶದವ | Persian |
| पुलिनम् | तीरम् | മണൽത്തിട്ട | ದಡ/ತೀರ | River bed |

| | | | | |
|---|---|---|---|---|
| महारथः | महात्मा | ശ്രേഷ്ഠൻ | ಶ್ರೇಷ್ಠನು | Veteran |
| राजमार्गः | मुख्यमार्गः | ദേശീയപാത | ರಾಜಮಾರ್ಗ | High way |
| वितन्यन्ते | विस्तार्यन्ते | വിസ്തരിക്കുന്നു | ವಿಸ್ತರಿಸಲಾಗಿದೆ | Being explained |
| संख्यावन्तः | पण्डिताः | പണ്ഡിതൻമാർ | ಪಂಡಿತರು | Scholars |

## किमधिगतम्

| पठनप्रवर्तनानि | स्वांशीकृतम् | भागिकतया स्वांशीकृतम् | प्रगतये प्रयत्नः विधेयः |
|---|---|---|---|
| जीवनचरितं लिखति | | | |
| पट्टिकां करोति | | | |
| प्रयोगविशेषं प्रत्यभिजानाति | | | |
| दैनिकीं लिखति | | | |
| आशयं लिखति | | | |
| पद्यानि आलपति | | | |
| गद्यक्रमं लिखति | | | |
| चित्रसञ्चयं निर्माति | | | |
| वाक्यानि निर्माति | | | |

## क्रियापदपरिचयः

| | | | |
|---|---|---|---|
| अभिप्रैति | - अभि+प्र+इण् गतौ | परस्मैपदी | लट्. प्र.पु.ए.व। |
| | अभिप्रैति - अभिप्रेतः- अभिप्रयन्ति। | | |
| प्रायच्छत् | - प्र + दाण् दाने | परस्मैपदी | लङ्. प्र.पु.ए.व। |
| | प्रायच्छत् - प्रायच्छताम् - प्रायच्छन्। | | |
| दृश्यते | - दृशिर् प्रेक्षणे (कर्मणि) | आत्मनेपदि | लट् प्र.पु.ए.व। |
| | दृश्यते - दृश्येते- दृश्यन्ते। | | |
| निषेवते | - नि+सिव् तन्तुसन्ताने | आत्मनेपदी | लट् प्र.पु.ए.व। |
| | निषेवते - निषेवेते - निषेवन्ते। | | |
| मन्यसे | - मन् ज्ञाने | आत्मनेपदी | लट् म.पु. ए.व। |
| | मन्यसे - मन्येथे - मन्यध्वे। | | |
| शक्यते | - शकि शक्तौ (कर्मणि) | अत्मनेपदी | लट् प्र. पु. ए. व। |
| | शक्यते - शक्येते - शक्यन्ते। | | |
| समायान्ति | - सम्+आ+या प्रापणे | परस्मैपदी | लट् प्र. पु. ब. व। |
| | समायाति - समायातः- समायान्ति। | | |
| विवृण्वन्ति | - वि+वृञ् वरणे | परस्मैपदी | लट्. प्र. पु. ब. व |
| | विवृणोति - विवृणुतः - विवृण्वन्ति। | | |
| पुष्णाति | - पुष पुष्टौ | परस्मैपदी | लट्. प्र. पु. ए. व |
| | पुष्णाति - पुष्णीतः- पुष्णन्ति। | | |
| अयापयामः | - या प्रापणे (णिचि) | परस्मैपदी | लट्. उ. पु. ब. व। |
| | अयापयम् - अयापयावः - अयापयामः। | | |
| अभ्यनन्दयम् | - अभि+ नन्द् (णिचि) | परस्मैपदी | लङ्. उ. पु. ए. व। |
| | अभ्यनन्दयम् - अभ्यनन्दयावः- अभ्यनन्दयामः | | |

## मातृका अभ्यासपत्रिका।

**अ) यथोचितं योजयत।**

क) आर्यभटः - वेण्वारोहः।

ख) भास्कराचार्यः - बृहत्संहिता।

ग) वराहमिहिरः - आर्यभटीयम्।

घ) सङ्गमग्राममाधवः - लघुभास्करीयम्।

**आ) उदाहराणनुसारं वाक्यं परिवर्त्य लिखतु।**

**उदा -** उपनेत्रस्य विना वाचयति। उपनेत्रेण विना वाचयति।

**क)** लक्ष्मणस्य विना रामः वनं न गच्छति।.......................................

**इ) सूचनानुसारं यात्राविवरणं लिखतु।**

**सूचनाः -** अनन्तपुरी- नियमसभा-पद्मनाभस्वामीमन्दिरम्- मृगशाला- शङ्खुमुखम् ।

**ई) वाक्यं परिवर्तयतु**

उदा- ज्वरः अस्ति। सः गृहकार्यं करोति

**यद्यपि** ज्वरः अस्ति **तथापि** सः गृहकार्यं करोति।

क) परीक्षा समागता। छात्राः सम्यक् न पठन्ति।

**उ) श्लोकं पठित्वा गद्यक्रमं लिखतु।**

यदा हिमार्तो ज्वलनं निषेवते
हिमं निदाघाभिहतोऽभिकाङ्क्षति ।
क्षुधान्वितोऽन्नम् सलिलं तृषान्वितो
बलं कुत:? किं च? कथं च? कस्य च ?

**सूचना-** यदा ...............ज्वलनं निषेवते .............. हिमं क्षुधान्वितः
............. तृषान्वितः सलिलम् ........... किञ्च कथं च कस्य

च (अस्ति)।

**ऊ) सूचनानुसारं आर्यभटीयम् अधिकृत्य टिप्पणीं लिखतु।**

**सूचनाः** - आर्यभटः - ज्योतिश्शास्त्रम् - चत्वारोभागाः- शङ्कुच्छाया - ज्यामितीयरूपाणां विस्तीर्णः - खगोलशास्त्रम्।

**ऊ) अधोदत्तानि क्रियापदानि उचितरूपेण पट्टिकां करोतु।**

**पठति , अकरोत् , वहति ,चलिष्यति, अधावत् , लिखिष्यति ।**

| लट् | लृट् | लङ् |
|---|---|---|
| | | |

# एककम् ४

# प्रसूनम्



## आमुखम्

मुकुलितः संस्कृतद्रुमः यथाकालमत्र कुसुमितो भवति। प्रसूननामकमिदमेककं मानविकताविषयकं भवति। साहित्यास्वदनेन वैकारिकबुद्धेः विकासो जायते। वैकारिकतलस्य प्रतिस्पन्दः एव मानविकतायाः आधारः। प्रसूननामके अस्मिन्नेकके द्वौ पाठौ स्तः। पितरौ संरक्षणीयौ इत्याशयप्रतिपादिका ‘कारुण्यं’ नामिका पटकथा तथा महाकवेः कालिदासस्य अभिज्ञानशाकुन्तलं , रघुवंशं , मेघदूतम् इत्येताभ्यः कृतिभ्यः समाकलितः मानविकताप्रतिपादकः एकैकः श्लोकश्च अन्तर्भावितः। सकलेषु जीवजालेषु एकात्मकतां पश्यति उत्तमः मानव इति तत्त्वम् अवलोकयामः।

# पाठः ९

# कारुण्यम्

पाठप्रवेशः

कलारूपाण्यधिकृत्य ईषत् ज्ञानम् आर्जितवन्तः किल? कलासु अभिनयस्य प्राधान्यं वर्तते। अस्माभिः परिचितम् अभिनयकलारूपं भवति चलच्चित्रं खलु? चलच्चित्रस्य निर्माणे अत्यन्तापेक्षितं घटकं किमस्ति? पटकथा खलु? कीदृशीयं पटकथेति पश्यामः।

## आमुखम्

आधुनिकसंस्कृतसाहित्यविभागेषु प्रचुरप्रचारमाप्तः साहित्यविभागः भवति पटकथासाहित्यम्। यस्य कस्यापि कार्यक्रमस्य चलच्चित्रांशस्य वा सज्जीकरणे पटकथायाः प्राधान्यमस्ति। अध्यायेऽस्मिन् चलच्चित्रस्य निर्माणाय लिखितायाः पटकथायाः परिचयः प्रदीयते। "जननी" इति संस्कृतह्रस्वचित्रस्य कतिपयभागानां पटकथा एव पाठभागत्वेन स्वीकृता।



## कथा एतावता......

विवेकः धनिकः युवकः भवति। तथापि स्वार्थपरतया बान्धवान् सर्वानपि सः निवारयति। किमधिकं, स्वमातरमपि। कालान्तरे सः यकृद्रोगबाधितः संवृत्तः। तस्य मित्रं वैद्यः रजीषः तस्य चिकित्सां करोति। यकृतः परिवर्तनमेव एकः उपायः। विवेकस्य अपूर्वरक्तगणः इत्यस्मात् उचितयकृतः प्राप्तिः दुष्करा भवति। अन्तिमे तस्य यकृत्परिवर्तनं प्रवृत्तम्। तदानीं सः कस्य कारुण्येन स्वस्मै पुनर्जन्म प्राप्तमिति जिज्ञासां प्रकटयति। रजीषः तमपरं प्रकोष्ठं प्रति नयति।



## दृश्यम् -6



| | | |
|---|---|---|
| सामान्यस्थानम् | - | अन्तः / बहिः |
| विशेषस्थानम् | - | चिकित्सालयस्य अपरः प्रकोष्ठः |
| समयः | - | मध्याह्नः |
| कथापात्राणि | - | विवेकः, तस्य पत्नी, विलासिनी, रजीषः, रजीषस्य माता च |

| विवरणम् | सम्भाषणम् |
|---|---|
| चिकित्सालयस्य अन्तर्भागः। रजीषः प्रकोष्ठस्य द्वारम् उद्घाट्य प्रविशति। रजीषेण सह विवेकः तस्य पत्नी च आगच्छतः। पत्नी विवेकं गृह्णन्ती तं नयति च। ते प्रकोष्ठे शयानाम् अम्बां पश्यन्ति। रजीषः विवेकं निवेदयति। | |
| रजीषः | विवेक! इयं माता एव तव प्राणदात्री। |

| | |
|---|---|
| विवेकः पत्नी च तां पश्यतः। तौ आश्चर्यचकितौ भवतः। विवेकस्य माता विलासिनी एव शय्यायां शेते। ६० वयस्का सा आतुरोचितं वेषमेव धरति। समीपे रजीषस्य माता तिष्ठति। एषापि ६० वयस्का एव। चुरिदार् इति वेषमुपनेत्रं च धरति। सा एतान् दृष्ट्वा मन्दं हसति। रजीषः विवेकं हस्तेन मातुः समीपगमनाय निर्दिशति। विवेकः पत्नी च मातरम् उपसर्पतः। विवेकः स्वमातरं दृष्ट्वा अनुतप्तः सन् विलपति। | |
| विवेकः | अम्ब! |
| विलासिनी | पुत्र! |
| विवेकः मातुः समीपे शय्यायाम् उपविशति। माता विवेकस्य हस्तं स्वहस्तेन परिगृह्णाति। मातृवात्सल्येन तं पुनरपि आह्वयति। | |
| विलासिनी | पुत्र! |
| विवेकः | अम्ब! |
| तदानीं रजीषस्य माता विवेकं किञ्चित् स्मारयति। | |
| रजीषस्य माता | विवेक! त्वया वृद्धभवने परित्यक्ता इयं माता तव रोगावस्थां विज्ञाय कियन्मात्रं दुखमनुभूता? जानासि किम्? |



तत्प्रश्नं श्रुत्वा पश्चात्तापविवशः विवेकः हृदयवेदनया आत्मना कृतमपराधम् अश्रुपातेन निगीर्णयितुं यतते।

**विवेकः** अम्ब! मातृवात्सल्यमनुभोक्तुम् अयोग्यः खल्वहम्।

माता तम् आश्वासयति। तं स्नेहेन वात्सल्येन अनुनयति।

**विलासिनी** पुत्र!

मातापुत्रयोः अभिज्ञाननिर्भरं दृश्यं दृष्ट्वा सन्तुष्टः रजीषः मन्दं हसति। सः स्वमातुः समीपं चलति। विवेकस्य पत्नी विलासिन्याः समीपं गच्छति। सर्वे सानन्दं तिष्ठन्ति।

(समाप्तम्)

### पदच्छेदः

| | | |
|---|---|---|
| इत्यस्मात् | - | इति + अस्मात्। |
| स्वमातरमपि | - | स्वमातरम् + अपि। |
| पुनरपि | - | पुनः + अपि। |
| खल्वहम् | - | खलु + अहम्। |

### विग्रहः

| | | |
|---|---|---|
| आश्चर्यचकितौ | - | आश्चर्येण चकितः, तौ। |
| मातृवात्सल्येन | - | मातुः वात्सल्यं, तेन। |
| स्वहस्तेन | - | स्वस्य हस्तः, तेन। |
| मातापुत्रयोः | - | माता च पुत्रः च मातापुत्रौ, तयोः। |
| अयोग्यः | - | न योग्यः। |

## पठनप्रवर्तनानि।



**साम्प्रतिके काले मानविकतायाः च्युतिः सम्भवति वेति चर्चां करोतु।**

**श्रद्धेयाः अंशाः**

भागभागित्वम्।

आशयस्पष्टता।

अवतरणरीतिः ।



**सहजीविस्नेहः इत्यस्मिन् विषये संघशः प्रभाषणमेकम् अवतारयतु।**

**श्रद्धेयाः अंशाः**

सम्भाषणशैली।

आशयस्पष्टता।

प्रश्नावलीनिर्माणचातुर्यम् ।

**संस्कृतहस्वचित्राणि चलच्चित्राणि च विलोक्य पटकथायाः विशेषता केति संवादं चालयतु।**

**श्रद्धेयाः अंशाः**

अवतरणशैलिः।

आशयस्पष्टता।

भागभागित्वम् ।

**अनुकम्पा, परस्पराश्रयत्वं, वात्सल्यम् इत्यादिविषयेषु पटकथां विरचय्य अवतारयतु।**

**श्रद्धेयाः अंशाः**

वाक्यघटना ।

आशयस्पष्टता।

पटकथानिर्माणसामर्थ्यम्।

**उदाहरणानुसारं वाक्यं परिवर्तयतु।**

उदा - षाजी पुस्तकशालां गच्छति। सः पुस्तकं **पठिष्यति**।

षाजी पुस्तकं **पठितुं** पुस्तकशालां गच्छति।

- अनामिका क्रीडाङ्गणं गच्छति। सा **क्रीडिष्यति**।
- मीनाक्षी परीक्षां लिखति। सा अध्यापिका **भविष्यति**।
- अतुलः वाहनं स्थगयति। सः मार्गविघ्नं **निवारयिष्यति**।
- रह्मत् कथां रचयति। सा धनं **सम्पादयिष्यति**।
- बालकः रोदिति। सः दुग्धं **प्राप्स्यति**।

**श्रद्धेयाः अंशाः**

वाक्यघटना ।

तुमुन्नन्त अव्ययप्रयोगसामर्थ्यम्।

आशयावगमनम्।

**सम्बोधनपदानि चित्वा टिप्पणीपुस्तके लिखतु।**

**श्रद्धेयौ अंशौ**

चयनसामर्थ्यम् ।

सम्बोधनपदपरिचयः(ज्ञानम्)।

**अधोदत्तां पट्टिकां चलच्चित्रनिदेशकयोः नामानि उपयुज्य पूरयतु।**

(पूरणाय अधोदत्तम् अधिकवाचनांशमपि स्वाकरणीयम्)

**श्रद्धेयः अंशः**

चयनसामर्थ्यम् ।

| चलच्चित्रस्य नाम | निदेशकस्य नाम |
|---|---|
| उदा - आदिशङ्कराचार्यः | जी.वी.अय्यर् |
| ................ | जी.वी.अय्यर् |
| प्रियमानसम् | .................. |
| ............... | जी.प्रभा |
| अनुरक्तिः | ................. |

## अधिकवाचनांशः

### संस्कृतचलच्चित्रेतिहासः।

भारतीयचलच्चित्रव्यवसायस्य कश्चन भाग एव भवति संस्कृतचलच्चित्रमण्डलम्। यद्यपि संस्कृतसाहित्येतिहासस्य महती पौराणिकता वर्तते तथापि संस्कृतचलच्चित्रेतिहासस्य उदयः १९८३ सामान्याब्धात् एवाभवत्। भासकालिदासादीनां पटकथासदृशानि नाटकानि प्रसिद्धानि। किन्तु संस्कृतचलच्चित्रमिति सङ्कल्पस्य साफल्यं निर्वर्णयितुं तदा एव शक्तमभवत् यदा जी.वी.अय्यर् महोदयकृतम् आदिशङ्कराचार्य नामकं चलच्चित्रं लोकार्पितमभवत्। कन्नडाचलच्चित्रस्य पितामह इत्यभिधीयमानः जी.वी.अय्यर् महोदयः १९८३ तमे वर्षे शङ्कराचार्यस्य जीवनकथायाः

चलच्चित्रभाष्यम् अकरोत्। तस्मादारभ्यते संस्कृतचलच्चित्रस्य इतिहासः। तस्मिन् वर्षे उत्तमचलच्चित्रम्, उत्तमा पटकथा, उत्तमं छायाग्रहणम्, उत्तमा जीवीतकथा इत्यादि चत्वारः पुरस्काराः अनेन चलच्चित्रेण अवाप्ताः। संस्कृतप्रेमिणां कृते अयमभिमानस्य विषयः।

द्वितीयचलच्चित्रमपि १९९३ तमे वर्षे अय्यर् महोदयेन एव निर्देशितम्। भगवद्गीता इत्यासीत् तस्य नाम। इदमपि उत्तमचलच्चित्रपुरस्कारेण पुरस्कृतमभवत्। ततः पश्चात् संस्कृतचलच्चित्ररङ्गम् अस्तंगत इति सर्वैः निश्चितम्। पश्चादागतैः संस्कृतज्ञैः चलच्चित्रकाव्यस्य सृष्टौ तावती मतिः न दत्ता।

द्वाविंशत् वर्षेभ्यः पश्चात् भारतस्य दक्षिणभागात् केरलराज्यादेव संस्कृतचलच्चित्रमण्डलस्य नवीनं जागरणं संवृत्तम्। २०१५ तमे वर्षे विनोद् मङ्करा नामकेन निर्देशकेन प्रियमानसम् इति तृतीयं संस्कृतचलच्चित्रं लोकाय समर्पितम्। तदनु प्रतिवर्षं संस्कृतचलच्चित्राणि प्रकाश्यमानानि सन्तीति सन्तोषस्य विषयः। विशिष्य केरलराज्यात् संस्कृतक्षेत्रे नूतनाः एतादृशाः आविष्काराः बहिरायान्ति इति अभिमानस्यावसरः।

# पाठः १० मुक्तकसौभगम्

**पाठप्रवेशः**

एकाश्रुकणमन्येभ्यो यदा सम्पातयाम्यहम्।
उदेत्यात्मनि मे तूर्णं सहस्रं सौरमण्डलम्।।
प्रसन्नस्मितमन्येभ्यो यदा सम्प्रददाम्यहम्।
तदा मे हृदि व्याप्नोति नित्यनिर्मलपौर्णमी।।

ज्ञानपीठपुरस्कारजेतुः कैरलीकवेः अक्कित्तं महोदयस्य वाक्यमिदम्। अस्य वाक्यस्य आशयः कः? सर्वाण्यपि शास्त्राणि अधीतवानपि मानविकता नास्ति चेत् अनेन ज्ञानेन किं प्रयोजनम् ? अत्र मानविकताप्रतिपादकान् कांश्चन संस्कृतकाव्यांशान् परिचिनुमः।

## आमुखम्

जीवनमूल्येषु अतिविशिष्टा भवति मानविकता। धार्मिकेषु, सांस्कारिकेषु, आर्थिकेषु, राष्ट्रियेषु च सकलेषु रङ्गेषु मानविकता यावत् प्रतिफलति तावत् सा सार्थका वर्तते। सहजीविषु स्नेहं, कारुण्यं, पारस्पर्यं च यः प्रकटयति स एव मानवः। कालिदासादयः महाकवयः स्नेहादिभावान् सरसं सुमधुरं च आविष्कृतवन्तः। पाठेऽस्मिन् कालिदासकृतिषु विशिष्य शाकुन्तले, रघुवंशे, मेघदूते च विद्यमानान् मानविकताप्रतिपादकान् कांश्चिदंशान् पश्यामः।

## अभिज्ञानशाकुन्तलम्

कविकुलगुरुणा कालिदासेन विरचितं विश्वप्रसिद्धं नाटकं भवति अभिज्ञानशाकुन्तलम्। मानविकतायाः मकुटोदाहरणमिदं नाटकम्। तस्य चतुर्थाङ्के शकुन्तला आश्रममृगान् वृक्षलतादींश्च सोदरान् इव परिपालयति। तत्र शकुन्तलायाः पतिगृहगमनावसरे कण्वः ताम् अधिकृत्य एवं वदति।

**पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या**
**नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।**
**आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः**
**सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।**



**पदच्छेदः**

| | | |
|---|---|---|
| युष्मास्वपीतेषु | - | युष्मासु + अपीतेषु । |
| नादत्ते | - | न + आदत्ते । |
| प्रियमण्डनापि | - | प्रियमण्डना + अपि। |
| भवत्युसवः | - | भवति + उत्सवः। |
| सेयम् | - | सा + इयम्। |
| सर्वैरनुज्ञायताम् | - | सर्वैः + अनुज्ञायताम्। |
| यस्या भवत्युत्सवः | - | यस्याः + भवति + उत्सवः। |

**विग्रहवाक्यानि**

| | | |
|---|---|---|
| अपीतेषु | - | न विद्यते पीतं (पानम्)येषां ते अपीताः तेषु। |
| प्रियमण्डना | - | प्रियं मण्डनं यस्याः सा । |
| कुसुमप्रसूतिसमये | - | कुसुमानां प्रसूतिः कुसुमप्रसूतिः तस्याः समये। |
| पतिगृहम् | - | पत्युः गृहम्। |

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| या | शकुन्तला |
| युष्मासु | भवत्सु |
| अपीतेषु | असिक्तेषु |
| प्रथमम् | पूर्वम् |
| जलम् | सलिलम् |
| पातुम् | ग्रहीतुम् |
| न व्यवस्यति | न यतिष्यते। |
| या | शकुन्तला |

| | |
|---|---|
| प्रियमण्डनापि | आभरणप्रियापि |
| भवताम् | युष्माकम्। |
| स्नेहेन | अनुरागेण |
| पल्लवम् | किसलयम् |
| न आदत्ते | न गृह्णाति। |
| वः | युष्माकम् |
| आद्ये | प्रथमे |
| कुसुमप्रसूतिसमये | पुष्पोद्गमनकाले |
| यस्याः | शकुन्तलायाः |
| उत्सवः | परमानन्दः |
| भवति | अस्ति। |
| सा इयं शकुन्तला | एषा शकुन्तला |
| पतिगृहम् | भर्तृगेहम् |
| याति | गच्छति। |
| सर्वैः | सकलैः युष्माभिः |
| अनुज्ञायताम् | अनुमन्यताम्। |

**आशयः**

वृक्षलतादीनां जलसेचनात्पूर्वं शकुन्तला नोद्यते जलं पातुम्। अलङ्कारप्रियापि सा तेषु स्नेहेन किसलयं न लुनाति। एवं प्रथमे प्रसूनप्रसवसमये यस्याः मनसि महान् सन्तोषो जायते, सा शकुन्तला अद्य भर्तृगृहं प्रयाति। सर्वे तस्यै यात्रानुमतिं ददतु इति कण्वमहर्षिः वनज्योत्स्नादीन् आदिशति।

## रघुवंशः



कालिदासस्य महाकाव्ययोः अन्यतरं भवति रघुवंशम्। तत्र चतुर्दशसर्गे रावणवधानन्तरम् अयोध्यां प्रत्यागतः



रामः अयोध्याधिपो भूत्वा राज्यपालने मग्नोऽभवत्। एकदा आसन्नप्रसवां सीतां लोकापवादेन रामः परित्यक्तुमैच्छत्। एतस्मिन् कर्मणि स्वानुजं लक्ष्मणं नियुयोज। सः सीतां तां वाल्मीकेरुटजाङ्कणे तत्याज। तदा कालिदासः यः लोके कष्टतामनुभवति तेनैव साकमस्माभिर्भाव्यमिति वाल्मीकिकर्मणा उच्चैरुद्घोषयति। तद्रङ्गं पश्यामः।

**तामभ्यगच्छद्रुदितानुसारी**

**कविः कुशेध्माहरणाय यातः।**

**निषादविद्धाण्डजदर्शनोत्थः**

**श्लोकत्वमापद्यत यस्य शोकः।।**

## पदच्छेदः

| | | |
|---|---|---|
| तामभ्यगच्छद्रुदितानुसारी | - | ताम् + अभ्यगच्छत् + रुदितानुसारी । |
| श्लोकत्वमापद्यत | - | श्लोकत्वम् + आपद्यत। |

## विग्रहः

| | | |
|---|---|---|
| रुदितानुसारी | - | रुदितम् अनुसर्तुं शीलम् अस्य इति। |

| | | |
|---|---|---|
| कुशेध्माहरणाय | - | कुशाश्च इध्मानश्च कुशेध्मानः तेषां हरणं कुशेध्माहरणं तस्मै। |
| निषादविद्धाण्डजदर्शनोत्थः | - | निषादेन विद्धः निषादविद्धः निषादविद्धश्चासौ अण्डजश्च निषादविद्धाण्डजः तस्य दर्शनं निषादविद्धाण्डजदर्शनं तस्मात् उत्थः । |

| अन्वयः | अन्वयार्थः |
|---|---|
| कुशेध्माहरणाय | दर्भेन्धनसमाहरणाय |
| यातः | गतः |
| कविः | वाल्मीकिः |
| रुदितानुसारी | क्रन्दनानुसारी |
| ताम् | सीताम् |
| अभ्यगच्छत् | अभ्ययात्। |
| निषादविद्धाण्डजदर्शनोत्थः | व्याधाहतपक्षिदर्शनोत्थः |
| यस्य | यस्य कवेः (वाल्मीकेः) |
| शोकः | दुःखम् |
| श्लोकत्वम् | काव्यताम् |
| आपद्यत | प्राप्नोत्। (समभवत्।) |

**आशयः**

निषादाहतपक्षिणं दृष्ट्वा यस्य हृदयात् रामायणकाव्यं निर्गलितं स महाकविः सीतायाः सकरुणं क्रन्दनं निशम्य कियान् करुणार्द्रः भवेत् ।

## मेघदूतम्

विश्वसाहित्ये प्रथमं सन्देशकाव्यं भवति मेघदूतम्। कालिदासेनैव एतत् काव्यं विरचितम्। अतितीव्रेण हृदयावर्जकेन प्रणयाविष्कारेण मकुटायमानमिदं काव्यम्। मानविकताप्रकाशने कालिदास इव न कश्चिदस्ति महाकविः। मेघसन्देशे तत् तत्र तत्र द्रष्टुं शक्यते। तादृशमेकमुदाहरणं पश्यामः।

**आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं**
**वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु।**
**काले काले भवति भवतो यस्य संयोगमेत्य**
**स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम्।।**

### पदच्छेदः

रघुपतिपदैरङ्कितम् - रघुपतिपदैः + अङ्कितम् ।
स्नेहव्यक्तिश्चिरविरहजम् - स्नेहव्यक्तिः + चिरविरहजम्।
मुञ्चतो बाष्पमुष्णम् - मुञ्चतः + बाष्पम् + उष्णम्।

### विग्रहः

प्रियसखम् - प्रियश्चासौ सखा च प्रियसखः तम्।
स्नेहव्यक्तिः - स्नेहस्य व्यक्तिः ।

| अन्वयः | अन्वयार्थः |
| --- | --- |
| काले काले | प्रतिवर्षकालम् |
| भवतः | भवतः (मेघस्य) |
| संयोगम् | सम्पर्कम् |
| एत्य | प्राप्य |

| | |
|---|---|
| चिरविरहजम् | बहुकालवियोगजन्यम् |
| उष्णम् | अशीतलम् |
| बाष्पम् | नेत्रजलम् |
| मुञ्चतः | त्यजतः |
| यस्य | एतस्य शैलस्य |
| स्नेहव्यक्तिः | प्रेमाविर्भावः |
| भवति। | अस्ति। |
| पुंसाम् | जनानाम् |
| वन्द्यैः | आराधनीयैः |
| रघुपतिपदैः | श्रीरामचन्द्रचरणविन्यासैः |
| मेखलासु | मध्यभागेषु |
| अङ्कितम् | चिह्नितम्, |
| तुङ्गम् | (तथा) उन्नतम् |
| अमुम् | समीपस्थम् |
| प्रियसखम् | प्रियमित्रम् |
| शैलम् | (एतम्) चित्रकूटपर्वतम् |
| आलिङ्ग्य | आश्लिष्य |
| आपृच्छस्व। | यात्रानुमतिं भवान् पृच्छतु। |

## आशयम्

हे मेघ! प्रावृट् कालं प्रति भवतः सम्पर्कात् चिरेण वियोगजन्यम् उष्णं नेत्रजलं मुञ्चतः चित्रकूटाचलस्य प्रेमाविर्भावः भवति। अतः त्वं रामपादन्यासैः मध्यप्रदेशेषु अङ्कितम् अमुं प्रियमित्रं चित्रकूटाचलम् आलिङ्ग्य गमनाय अनुज्ञां पृच्छ। अत्र कविना

अचेतनयोः पर्वतमेघयोः मानववत्करणं कल्पितम्। तयोः उपकार्योपकारभावं च प्रदर्शयति। एवं संस्कृतसाहित्ये मानविकताप्रतिपादकान् अनेकान् अंशान् द्रष्टुं शक्नुमः। तैः उद्बुद्धाः सामाजिकाः श्रेयसे यतन्ते।

## पठनप्रवर्तनानि।



**श्लोकान् सतालमालपतु।**

**श्रद्धेयाः अंशाः**

आलापनसामर्थ्यम्।

आशयस्पष्टता।

तालबोधः ।



**पद्यं पठित्वा गद्यक्रमम् आशयं च लिखतु।**

**श्रद्धेयौ अंशौ**

वाक्यघटना।

आशयस्पष्टता।



**इष्टतमं श्लोकम् अधिकृत्य आस्वादटिप्पणीं लिखतु।**

**श्रद्धेयाः अंशाः**

टिप्पणीलेखनसामर्थ्यम्।

आशयस्पष्टता।

भाषाशुद्धिः।



**कालिदासस्य मानविकतामधिकृत्य प्रभाषणं विलिख्य अवतारयतु।**

**श्रद्धेयौ अंशौ**

आशयस्पष्टता।

अवतरणशैली।

## उदाहरणानुसारं वाक्यशृङ्खलां निर्मातु।

**उदा - व्यरचयत्, अभिज्ञानशाकुन्तलम्- कालिदासः- नाटकम्- विश्वप्रसिद्धम्।**

व्यरचयत्।

कालिदासः व्यरचयत्।

कालिदासः नाटकं व्यरचयत्।

कालिदासः अभिज्ञानशाकुन्तलं नाटकं व्यरचयत्।

कालिदासः विश्वप्रसिद्धम् अभिज्ञानशाकुन्तलं नाटकं व्यरचयत्।

**क)** मेघदूतम्- प्रथमं- विश्वसाहित्ये - सन्देशकाव्यं- भवति।

**ख)** परित्यक्तां- वाल्मीकिः- रामेण- असान्त्वयत्- सीताम्।

**श्रद्धेयौ अंशौ**

वाक्यघटना।

आशयस्पष्टता।

## उदाहरणानुसारं सति सप्तमीम् उपयुज्य वाक्यानि परिवर्तयतु।

उदा- **यूयम् अपीताः** । शकुन्तला जलं पातुं न व्यवस्यति।

**युष्मासु अपीतेषु** शकुन्तला जलं पातुं न व्यवस्यति।

**क)** मेघाः व्याप्ताः । वृष्टिः अजायत।

**ख)** बालकाः आगताः । सन्तोषः सञ्जातः।

**ग)** उत्सवाः समायाताः। वणिजः उत्साहभरिताः अभवन्।

**श्रद्धेयः अंशः**

वाक्यघटना।



**प्रादेशिककविताभ्यः मानविकताप्रकाशिकाः पङ्क्तीः चित्वा अवतारयतु।**

**श्रद्धेयाः अंशाः**

आशयस्पष्टता।
चयनसामर्थ्यम्।
अवतरणशैली।

## शब्दकोशः।

| संस्कृतम् | संस्कृतम् | कैरली | कन्नडा | आङ्गलम् |
|---|---|---|---|---|
| प्रसूनम् | पुष्पम् | പൂവ് | ಹೂವು | Flower |
| उपसर्पतः | समीपम् अगच्छतः | അടുത്ത് എത്തിയ ആളിന്റെ | ಹತ್ತಿರ ಹೋಗುತ್ತಾರೆ | Of the person who has come closer |
| ईषत् | किञ्चित् | അല്പം | ಸ್ವಲ್ಪ | A little |
| यकृत् | यकृत् | കരൾ | ಯಕೃತ್ತು | Liver |
| अनुतप्तः | पश्चात्तप्तः | പശ്ചാത്ത- -പിച്ചവൻ | ಪಶ್ಚಾತ್ತಾಪ ಪಟ್ಟ | Remorseful per- son |
| निदेशितम् | निर्दिष्टम् | സംവിധാനം ചെയ്യപ്പെട്ടു | ನಿರ್ದೇಶಿಸಿದ್ದ | Had been directed |

# किमधिगतम्

| पठनप्रवर्तनानि | स्वांशीकृतम् | भागिकतया स्वांशीकृतम् | प्रगतये प्रयत्नः विधेयः |
|---|---|---|---|
| पटकथां विरचयति | | | |
| सम्बोधनपदानि लिखति | | | |
| श्लोकान् सतालमालपति | | | |
| गद्यक्रमं लिखति | | | |
| आस्वादनटिप्पणीं लिखति | | | |
| उपन्यासं लिखति | | | |
| वाक्यानि निर्माति | | | |
| प्रभाषणं करोति | | | |

## क्रियापदपरिचयः

| | | | |
|---|---|---|---|
| अवलोकयामः:- | अव+ लोकृ भासार्थे | परस्मैपदी | लट्. उ.पु.ब. व। |
| | अवलोकयामि - अवलोकयावः - अवलोकयामः। | | |
| प्रदीयते - | प्र + दाञ् दाने (कर्मणि) | आत्मनेपदी | लट्. प्र.पु.ए.व। |
| | प्रदीयते - प्रदीयेते - प्रदीयन्ते। | | |
| निवारयति - | नि +वृ आवरणे | परस्मैपदी | लट् प्र.पु.ए.व। |
| | निवारयति - निवरयतः - निवारयन्ति। | | |
| आह्वयति - | आ+ह्वे शब्दे | परस्मैपदी | लट् प्र.पु.ए.व। |
| | आह्वयति - आह्वयतः - आह्वयन्ति। | | |
| स्मारयति - | स्मृ चिन्तायाम् (णिचि) | परस्मैपदी | लट् प्र.पु. ए.व। |
| | स्मारयति - स्मारयतः- स्मारयन्ति। | | |
| यतते - | यती प्रयत्ने | अत्मनेपदी | लट् प्र. पु. ए. व। |
| | यतते - यतेते - यतन्ते। | | |
| अनुनयति - | अनु+ णीञ् प्रापणे | परस्मैपदी | लट् प्र. पु. ए. व। |
| | अनुनयति - अनुनयतः - अनुनयन्ति। | | |
| परिचिनुमः - | परि+चिञ् चयने | परस्मैपदी | लट्. उ. पु. ब. व |
| | परिचिनोमि - पिचिनुवः - परिचिनुमः। | | |
| व्यवस्यति - | वि+अव+षो अन्तकर्मणि | परस्मैपदी | लट्. प्र. पु. ए. व |
| | व्यवस्यति - व्यवस्यतः - व्यवस्यन्ति। | | |
| आदत्ते - | आ+डुदाञ् दाने | परस्मैपदी | लट्. प्र. पु. ए. व। |
| | आदत्ते - आददाते - आददते। | | |
| आपृच्छस्व - | आ+ प्रच्छि ज्ञीप्सायाम् | आत्मनेपदी | लोट् म. पु. ए. व। |
| | आपृच्छस्व - आपृच्छेथाम् - आपृच्छध्वम्। | | |

## मातृका अभ्यासपत्रिका।

**अ) सम्भाषणांशान् पूरयत।**

अनामिका - नमस्ते सीनत् ।.................?

सीनत् - नमस्ते अनामिका। मम हस्ते मेघदूतम् भवति।

अनामिका - .....................................?

सीनत् - मेघदूतं कालिदासेन विरचितं काव्यं भवति।

अनामिका - .....................................?

सीनत् - अत्र यक्षः मेघं प्रति सन्देशं प्रेषयति इति वर्णयति।

अनामिका - .....................................?

सीनत् - मम संस्कृतपाठपुस्तके एतत् पुस्तकमधिकृत्य परामर्शः अस्ति। तत् पठनाय।

**आ) कोष्ठकस्थितस्य निर्देशस्य अनुसारम् उचितपदेन रिक्तस्थानं पूरयतु।**

क) कुक्कुटः उद्यानं............. चरणाभ्याम् आहारं विकिरति। (गम्-त्त्वा)

ख) काव्यानि .................. छात्राः उत्सुकाः भवन्ति। (पठ्-तुमुन्)

ग) अनुकम्पाम् ............. पठकथां निर्मातु। (अधि+कृ- ल्यबन्तम्)

**इ) श्लोकं पठित्वा अधोदत्तप्रश्नानाम् उत्तराणि लिखत।**

**पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या**
**नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।**
**आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युसवः**
**सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।**

क) 'युष्मद्' शब्दरूपम् एकं पदं चित्वा लिखतु।

ख) 'गच्छति' इति पदस्य समानार्थकं पदं चित्वा लिखतु।

ग) तृतीयाविभक्ति बहुवचनरूपं पदं श्लोकात् चित्वा लिखतु।

घ) 'पिबति' इत्यस्य तुमुन्नन्तरूपं श्लोकात् चित्वा लिखतु।

**ई) उदाहरणानुसारं सति सप्तमीम् उपयुज्य वाक्यानि परिवर्तयतु।**

उदा- **यूयम् अपीताः । शकुन्तला जलं पातुं न व्यवस्यति।**

**युष्मासु अपीतेषु** शकुन्तला जलं पातुं न व्यवस्यति।

**क)** मेघाः व्याप्ताः । वृष्टिः अजायत।

**ख)** बालकाः आगताः । सन्तोषः सञ्जातः।

# अक्षरमाला

## स्वराक्षराणि

| | | | | |
|---|---|---|---|---|
| अ | आ | इ | ई | उ |
| ऊ | ऋ | ॠ | ऌ | ए |
| ऐ | ओ | औ | अं | अः |

## व्यञ्जनाक्षराणि

| | खरः | अतिखरः | मृदुः | घोषः | अनुनासिकः |
|---|---|---|---|---|---|
| कवर्गः | क | ख | ग | घ | ङ |
| चवर्गः | च | छ | ज | झ | ञ |
| टवर्गः | ट | ठ | ड | ढ | ण |
| तवर्गः | त | थ | द | ध | न |
| पवर्गः | प | फ | ब | भ | म |

| अन्तःस्थाः /मध्यमाः | | | |
|---|---|---|---|
| य | र | ल | व |

| ऊष्माणः | | | |
|---|---|---|---|
| श | ष | स | ह |

# ഭാരതത്തിന്റെ ഭരണഘടന

ഭാഗം IV ക

## മൗലികകർത്തവ്യങ്ങൾ

**51 ക. മൗലികകർത്തവ്യങ്ങൾ - താഴെപ്പറയുന്നവ ഭാരതത്തിലെ ഓരോ പൗരന്റെയും കർത്തവ്യം ആയിരിക്കുന്നതാണ് :**

(ക) ഭരണഘടനയെ അനുസരിക്കുകയും അതിന്റെ ആദർശങ്ങളെയും സ്ഥാപനങ്ങളെയും ദേശീയപതാകയെയും ദേശീയഗാനത്തെയും ആദരിക്കുകയും ചെയ്യുക;

(ഖ) സ്വാതന്ത്ര്യത്തിനുവേണ്ടിയുള്ള നമ്മുടെ ദേശീയസമരത്തിന് പ്രചോദനം നൽകിയ മഹനീയാദർശങ്ങളെ പരിപോഷിപ്പിക്കുകയും പിൻതുടരുകയും ചെയ്യുക;

(ഗ) ഭാരതത്തിന്റെ പരമാധികാരവും ഐക്യവും അഖണ്ഡതയും നിലനിർത്തുകയും സംരക്ഷിക്കുകയും ചെയ്യുക;

(ഘ) രാജ്യത്തെ കാത്തുസൂക്ഷിക്കുകയും ദേശീയസേവനം അനുഷ്ഠിക്കുവാൻ ആവശ്യപ്പെടുമ്പോൾ അനുഷ്ഠിക്കുകയും ചെയ്യുക;

(ങ) മതപരവും ഭാഷാപരവും പ്രാദേശികവും വിഭാഗീയവുമായ വൈവിധ്യങ്ങൾക്കതീതമായി ഭാരതത്തിലെ എല്ലാ ജനങ്ങൾക്കുമിടയിൽ, സൗഹാർദവും പൊതുവായ സാഹോദര്യമനോഭാവവും പുലർത്തുക. സ്ത്രീകളുടെ അന്തസ്സിന് കുറവു വരുത്തുന്ന ആചാരങ്ങൾ പരിത്യജിക്കുക;

(ച) നമ്മുടെ സമ്മിശ്രസംസ്കാരത്തിന്റെ സമ്പന്നമായ പാരമ്പര്യത്തെ വിലമതിക്കുകയും നിലനിറുത്തുകയും ചെയ്യുക;

(ഛ) വനങ്ങളും തടാകങ്ങളും നദികളും വന്യജീവികളും ഉൾപ്പെടുന്ന പ്രകൃത്യാ ഉള്ള പരിസ്ഥിതി സംരക്ഷിക്കുകയും അഭിവൃദ്ധിപ്പെടുത്തുകയും ജീവികളോട് കാരുണ്യം കാണിക്കുകയും ചെയ്യുക;

(ജ) ശാസ്ത്രീയമായ കാഴ്ചപ്പാടും മാനവികതയും, അന്വേഷണത്തിനും പരിഷ്കരണത്തിനും ഉള്ള മനോഭാവവും വികസിപ്പിക്കുക;

(ഝ) പൊതുസ്വത്ത് പരിരക്ഷിക്കുകയും ശപഥം ചെയ്ത് അക്രമം ഉപേക്ഷിക്കുകയും ചെയ്യുക;

(ഞ) രാഷ്ട്രം യത്നത്തിന്റെയും ലക്ഷ്യപ്രാപ്തിയുടെയും ഉന്നതതലങ്ങളിലേക്ക് നിരന്തരം ഉയരത്തക്കവണ്ണം വ്യക്തിപരവും കൂട്ടായതുമായ പ്രവർത്തനത്തിന്റെ എല്ലാ മണ്ഡലങ്ങളിലും ഉൽകൃഷ്ടതയ്ക്കുവേണ്ടി അധ്വാനിക്കുക;

(ട) ആറിനും പതിനാലിനും ഇടയ്ക്ക് പ്രായമുള്ള തന്റെ കുട്ടിക്കോ തന്റെ സംരക്ഷണയിലുള്ള കുട്ടികൾക്കോ, അതതു സംഗതി പോലെ, മാതാപിതാക്കളോ രക്ഷാകർത്താവോ വിദ്യാഭ്യാസത്തിനുള്ള അവസരങ്ങൾ ഏർപ്പെടുത്തുക.

# കുട്ടികളുടെ അവകാശങ്ങൾ

പ്രിയമുള്ള കുട്ടികളേ,

നിങ്ങൾക്കുള്ള അവകാശങ്ങളെന്തെല്ലാമെന്ന് അറിയേണ്ടതില്ലേ? അവകാശങ്ങളെക്കുറിച്ചുള്ള അറിവ് നിങ്ങളുടെ പങ്കാളിത്തം, സംരക്ഷണം, സാമൂഹികനീതി എന്നിവ ഉറപ്പാക്കാൻ പ്രേരണയും പ്രചോദനവും നൽകും. നിങ്ങളുടെ അവകാശങ്ങൾ സംരക്ഷിക്കാൻ ഇപ്പോൾ ഒരു കമ്മീഷൻ പ്രവർത്തിക്കുന്നുണ്ട്. കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ എന്നാണ് അതിന്റെ പേര്. എന്തെല്ലാമാണ് നിങ്ങൾക്കുള്ള അവകാശങ്ങൾ എന്നു നോക്കാം.

- സംസാരത്തിനും ആശയപ്രകടനത്തിനുമുള്ള സ്വാതന്ത്ര്യം
- ജീവന്റെയും വ്യക്തിസ്വാതന്ത്ര്യത്തിന്റെയും സംരക്ഷണം
- അതിജീവനത്തിനും പൂർണ്ണവികാസത്തിനുമുള്ള അവകാശം
- ജാതി-മത-വർഗ-വർണ്ണ ചിന്തകൾക്കതീതമായി ബഹുമാനിക്കപ്പെടാനും അംഗീകരിക്കപ്പെടാനുമുള്ള അവകാശം
- മാനസികവും ശാരീരികവും ലൈംഗികവുമായ പീഡനങ്ങളിൽ നിന്നുള്ള സംരക്ഷണത്തിനും പരിചരണത്തിനുമുള്ള അവകാശം
- പങ്കാളിത്തത്തിനുള്ള അവകാശം
- ബാലവേലയിൽനിന്നും ആപൽക്കരമായ ജോലികളിൽനിന്നുമുള്ള മോചനം
- ശൈശവവിവാഹത്തിൽനിന്നുള്ള സംരക്ഷണം
- സ്വന്തം സംസ്കാരം അറിയുന്നതിനും അതനുസരിച്ച് ജീവിക്കുന്നതിനുമുള്ള സ്വാതന്ത്ര്യം
- അവഗണനകളിൽനിന്നുള്ള സംരക്ഷണം
- സൗജന്യവും നിർബന്ധിതവുമായ വിദ്യാഭ്യാസ അവകാശം
- കളിക്കാനും പഠിക്കാനുമുള്ള അവകാശം
- സ്നേഹവും സുരക്ഷയും നൽകുന്ന കുടുംബവും സമൂഹവും ലഭ്യമാകാനുള്ള അവകാശം

## നിങ്ങളുടെ ചില ഉത്തരവാദിത്വങ്ങൾ

- സ്കൂൾ, പൊതുസംവിധാനങ്ങൾ എന്നിവ നശിപ്പിക്കാതെ സംരക്ഷിക്കുക.
- സ്കൂളിലും പഠനപ്രവർത്തനങ്ങളിലും കൃത്യനിഷ്ഠ പാലിക്കുക.
- സ്കൂൾ അധികാരികളെയും അധ്യാപകരെയും മാതാപിതാക്കളെയും സഹപാഠികളെയും ബഹുമാനിക്കുകയും അംഗീകരിക്കുകയും ചെയ്യുക.
- ജാതി-മത-വർഗ-വർണ്ണ ചിന്തകൾക്കതീതമായി മറ്റുള്ളവരെ ബഹുമാനിക്കാനും അംഗീകരിക്കാനും സന്നദ്ധരാവുക.


*ബന്ധപ്പെടേണ്ട വിലാസം:*

**കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ**

ശ്രീ ഗണേഷ്, റ്റി.സി. 14/2036, വാൻറോസ് ജംങ്ഷൻ,
കേരള യൂണിവേഴ്സിറ്റി പി.ഒ, തിരുവനന്തപുരം – 34
ഫോൺ 0471 – 2326603
ഇ- മെയിൽ childrights.cpcr@kerala.gov.in, rte.cpcr@kerala.gov.in
വെബ്സൈറ്റ് : www.kescpcr.kerala.gov.in


ചൈൽഡ് ഹെൽപ്പ് ലൈൻ - 1098, ക്രൈം സ്റ്റോപ്പർ - 1090, നിർഭയ – 1800 425 1400
കേരള പൊലീസ് ഹെൽപ്പ് ലൈൻ - 0471 – 3243000/44000/45000

*online **R.T.E Monitoring : www.nireekshana.org.in***